M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref. / Ser. V/14

Title: Rasa Manjari Tika

Incomplete

Rasa Manjari Tīkā
by
Chintāmani (Shèsha) Son of Narsimha.

V/14

InComplete

		Rasa Manjari Tika.	Title
		Shesha (Chintamani Son of	~~Author~~
		Narsimha)	~~Editor~~
			Year, Vols.
SW			Publisher
V/14		Presented by Prof. V. R. Trivedi	Remarks

र॰टी॰

॥श्रीगणेशाय नमः॥ प्रेमार्द्रार्द्रनिरीक्षणादनुदिनं प्रस्तुंबनालिंगनाधोदंतहृतसीकृता
न्नखपदोद्रेखाद्वियोगाद्भयः॥ यत्नोः कोपिपरस्परागतसखीसंभाषणज्ञायते
शृंगारः सविजृंभते नवरुमेस स्मीनृसिंहाश्रये॥१॥ रक्तोद्भिन्नष्टष्टीविनिर्यत्फ
ॡ४ लौ इस्फुरद्दंतकांतो मणिकांतस्तंभबुध्या॥ पिरभ्यांहिस्सस्मेरमाजो किलैमांकपो
लौ विघर्णन्गणेशः पुनातु॥२॥ इंद्रादिदेवपरिसेवितपादपद्मां पद्मासनां विक
चपद्मदलायताक्षीं॥ प्रद्मप्रभां विमलपद्मनिभाननां तां वागीश्वरीमनुदिनं श
रणं प्रपद्ये॥३॥ अज्ञानहिरण्यकशिपोर्द्दलने सा हान्त्र सिंहएव परः॥ तमहं शे
षउपासे पितरं श्रीमन्नृसिंहाख्यं॥४॥ अतिविषमरसमंजर्यो व्याख्यामेतां परो
पकाराय॥ तनुते नृसिंहतनयः श्रीमान् चिंतामणिः शेषः॥५॥ यद्यपि दुर्जनतो १
पायेषानस्यान्मयानताटीका॥ तदपि मनन्ति सुधियः सज्जनपादार्पितां करिष्ये
हं॥६॥ इह खलु सकलकविकुलमुकुरमणिमरीचिमंजरीनिराजितचरणक

मलहरचरणपरिचरणपरापणांतःकरणः श्रीभानुकरनामा कविः काव्यं यशसे
ऽर्थकृते व्यवहारविदे शिवेतरक्षतये॥ सद्यः परनिर्वृत्तये कांतासम्मिततयो
पदेशयुजे इत्याद्यलंकारिकप्रमाणात्काव्यस्य कीर्त्याद्यनेकश्रेयःसाधन
तां काव्यालापांश्च वर्जये दित्यादिनिषेधशास्त्रस्य सत्काव्यविषयतां च पश्य
न् शृंगाररसप्रधानं रसमंजरीनामकं ग्रंथं विदधानोऽदुष्टशब्दार्थयोः का
व्यस्वरूपत्वात् न्निर्माणस्य तत्प्रतिपत्तिमूलत्वेन विशिष्टशब्दं शब्दार्थयो
श्च॥ शब्दजातमशेषमित्यादि वायुसंहितावचवचनबलेन हरांबाभ्यामेव त
त्वदर्शनात्त॥ तत्प्रतिपत्तये निःप्रत्यूहपरिसमाप्तये च तन्निर्देशरूपं मंगल
मंगलं शिष्यशिक्षार्थमुपनिबध्नाति॥ ॥ आत्मीयमिति॥ अन्यत्रान्यथा
त्वयानुपपत्त्या यत्तच्छब्दाध्याहारेणयोज्यं॥ सहरो निजउन्नत्त सर्वाशुभहरण

र॰टी॰श्री॰

शिलोऽयमिति। सर्वोत्कर्षेण वर्त्तत इत्यर्थः॥ उत्कर्षस्य नमस्यत्वं विना न्यूनतया
तं प्रणतोस्मीत्यर्थरियाति॥ उत्कर्षश्च श्रवणस्मरणकीर्त्तनानामन्यतरेण
पित्रकारेमनोमंदिरानयनेनसकलपातकनाशकारितया महामंगलमंगला
स्पदमत्वमित्वं॥ ननु शक्तिरहितेश्वरस्य निर्गुणतया यतो वाचो निवर्त्तंते अ
प्राप्य मनसा सह इत्यादिश्रुतेर्न नमस्कारायोग्यतया कथं नमस्करणीयत्वमि
त्याशंक्य तं विशिनष्टि॥ प्रियतमामंगे दधान इति॥ प्रियतमां च तां भामां गो
पांगी राधां चांगे दधानो बिभ्राण इत्यर्थः॥ आतिशयिनिकतमप्रत्ययतो तेन
प्रियाशब्दप्रयोगेणातिप्रेमास्पदतया धारणयोग्यता सूचिता॥ अत ए
वांगे दधानो न तु न्यसिंहादिवल्लक्ष्मीमिवैकदेशे संगादे॥ यत्तदोर्नित्य
संबंधात्तक इत्यपेक्षायामाह॥ ॥यः निम्नोन्नतायां भुविपुरतः आत्मीयं २

ती३

चरणंदधाति॥ कदाचित्कुसुमपुष्पसमूहननम्रवपुः श्रवकारिकावनविहारेघपायघ
मार्गे निम्नोन्नतायां भुवि नाचोच्चप्रदेशे पुरतो यतः प्रपमस्मितिपावत॥ आ
त्मीयं चरणं निजं घ्रिं दधाति बुद्धिपूर्वं निक्षिपतीत्यर्थः॥ दर्शाहीतिपाठः॥ अयमे
वार्थः॥ अमाशंकया पृथुऊघनघनस्तनभारमंथरतयोच्चप्रदेशस्य पुष्पाणा ५५४
मुद्धीयोर्द्धीयग्रहणे कदाचिदस्यां श्रमो न वेदिति संभावनो यास्त्वीयेनैव करेण
निजपाणिनैव चंपकादितरोः पुष्पं पुष्पं पुष्पाणि कर्षतीति॥ आकृष्य वचिनोती
त्यर्थः॥ सतौं जोजार्थमितिशेषः॥ नहेतावन्मात्रं किंच अन्यदपीति किंचेत्य
स्यार्थः॥ तत्र च पुष्पापुद्दीपनविभावसंदर्शनेनालंबनविभावस्य स्वीयां
गएव सत्वात्तच्चस्फुरतार्थं हरिणा कर्म निर्मितशयनीये निजे नागे निजराग
राधया वै निर्जितानि निद्रां करोतीत्यर्थः॥ शिरीषकुसुमसुकुमारं तदंगमतिको

नश्यन्ती यत्संपर्केण हिरिणीनां गमिष्यतीति भियेति भावः ॥ एतत्सर्वं स्वयमे
वकथं चेष्टितवानित्याशंकायां हेतुगर्भं विशेषणमाह ॥ ॥ अंतः प्रेमभराल
सइति ॥ अंतः आभ्यंतरे यः प्रेमभरेण स्नेहस्तेन अलसो निपुणो तु मस यो
मर्थ इत्यर्थः ॥ यस्त्वकेन चिदंतः प्रेमभरालसामिति पाठमंगीकृत्य प्रियतमा
विशेषणत्वेन व्याख्यातं तदसत् विषममार्गे प्रथमतच्छब्देन निर्देशपादे
न्वीयकन्निष्ठतया नियोज्यायाः अपि नायिकायास्तत्कथनेकारणतयान
यकविशेषणोपन्यासस्यैवोचितत्वात् रसस्य निष्प्रसंगात् ॥ आत्मीयमि २
द्वा २ ति ॥ आत्मनः अयमिति विग्रहे वृद्धौ इति छुत्रत्यये इयादेशो रूपसि
द्धिः ॥ अत्र केचित् दात्मनि विश्वजनभोगोत्तरपदात् खइति खप्रत्ययेन पस

बाधलरनाचि नैतयुक्तं वा अपवादभावस्य समानविषयतया इदमर्थविहितप्रत्य
हितायो विहितरूपस्य चपरत्वसरं भिन्नविषयतया समानविषयत्वाभावात् ॥ ना
प्राप्यमाणा च नहिना प्राप्ते तेवरुद्धिरवसरं आरभ्यते येन तस्य बाधः स्यात् ॥ किं
तर्हि प्राप्तिकीनाद्य इति तस्यैव बाधो युक्तः ॥ स्वीयेनेत्यत्र गणादित्वाद् छः ॥ प्रिय
तमा मित्यत्र अतिशायनेतमप्विष्टना विनितमप् ॥ अत्र कश्चित् ॥ इयमासा
मतिशयेन प्रियेति विग्रहे स्त्रियः प्रांतातंतरभावेन किमपेक्षया अस्याः प्रि
यत्वं वक्तव्यमिति तमप्प्रत्यया नुपपत्तिं वर्णयांचकार ॥ तत्र अतिशयाय
मात्रे तमप्प्रत्ययविधानात् ॥ गंधादेः कांतांतरस्य ऊहनकत्वाच्च न च
तत्र हरस्य स्वीत्वा ऽनभिमानइति वाच्यं ॥ श्रीमत्काशीशकाग्रीगिरि
वरतनया ऊरूढाचेति तिरस्कः प्रेयस्यस्त्वात्सुकाश्यां नवासिततरुच्चिर्नान्य

योः प्रेमवांस्तत्वं॥ यस्मात्तस्मान्नाउः श्रितगरौ... आनन्ना लने त्रान् प्रस्त
ते पुत्रान द्वैद्रुमे क्षीन हृहप त्रुपतेनो गऊास्या न्पऊस्यानिति॥ तपानमस्तसे
नवा यास्तु कांता स्तिस्त्रः प्रकीर्तिताः॥ यस्य गंगेंदुलेखा च पार्वती च कवत्र
लेत्यादौ महता प्रबंधेन कविभिरुपवर्ण्यमानत्वात्॥ प्रियाशब्दस्य संबंधिशब्द
त्वेनपेक्षा या याः प्रियाः स्तासामतिशयेनेयं प्रियेति समाधानमप्यस्तु इदं॥ यासां पत्यु
रेकं प्रियत्वं तन्न प्रियापेक्षया सामतिशयार्थता वक्तव्या॥ अत्र हरस्यान्यप्रिया
सु प्रियत्वाभिमानाभावेन तदपेक्षयाऽस्यामतिशयार्थवाचो युक्तेरयुक्तत्वात्॥ ४
तस्माद्घनस्तनाभिरुक्तं न रेवसम्यक्॥ गर्भं गिरिच सानं तेत्यमरः॥ निम्नं गभीरं
र गंभीरमिति च प्रांकांचा सेवितर्के चेति विश्वः॥ तल्पं शयनीयेस्यादिति च॥ वे
दभादिति॥ तत्र तल्पं॥ अस्य शेषमात्राभिरनन्यगुणगुंफिता॥ विपंचीस्व

पा१ शेषस्तमात्राभिः१

रसैभाग्याय हृदीरितिरिष्यत इति॥ शृंगाररसस्यांनस्यचिका केलिकीर्त्तिः प्र
सादगुणः॥ अनुकूलो नायकः॥ स्वाधीनपतिका नायिका॥ शब्दालंकारा
नुप्रासकाव्यलिंगेऽलंकारौ॥ एतेषां लक्षणानि॥ उदितस्य पाथिकत्वं यस्य प्रस
त्तिः सोच्यते बुधैरिति वाग्भटे॥ अनुरक्तः॥ स्वनायांयः॥ सदात्यक्तपरांगनः
सीतायां रामवच्चो यमनुकूलनः स्मृतो यथेति॥ यस्या रतिगुणाकृष्टः पतिः
पार्श्वं न मुंचति॥ विचित्रविभ्रमासक्ता सा स्वाधीनपतिर्यथेति॥ शृंगारति
लके॥ तुल्यश्रुत्यक्षरावृत्तिरनुप्रासः स्फुरद्गुणः॥ अनत्ययः॥ स्याच्छेकानां
सारानां लाटश्च सऊति॥ हेतोर्वाक्यपदार्थत्वे काव्यलिंगमुदाहृतमिति च॥ शार्दूल
विक्रीडितं वृत्तं॥ तल्लक्षणं तु सूर्याश्वैर्मसजस्तताः सगुरवः॥ शार्दूलविक्रीडित
मिति॥ विचारविशेषस्तु ग्रंथविस्तरभियालिखितः॥ इति प्रथमश्लोकार्थः॥ १॥

कविरिति। नौ सकलरसिकजनमनोहारी समुचितेष्टदेवताचरणपरिचरणकरण
फलभूतं श्रेयः प्राप्य प्रवृत्य पेक्षितप्रयोजनकथनपूर्वकं ग्रंथप्रोत्तरे। चिकीर्षितं प्रति
जानीते॥ विद्वत्कुलेति॥ विदुषां परमरमणीयानां पंडितानां कुलं समूहस्तस्य
मनांसि अज्ञानवत्तया सारासारग्रहणपरिहरणचतुराणि तान्येव भृंगा
स्तेषां रसव्यासंग आस्वादसंबंधे शृंगाररसासक्तिस्तद्धेतवे तत्कारणा
य। श्रीः प्रति नाय्यं रूपप्रधानकविता श्रवणमात्रेण श्रवणहृद्या हृदयदयित
यामौलिमंडलोद्दीपनकारणकोमलत्वाविलासस्फुरणसाधारणकार
णभूतां शक्तिरितियावत्॥ तद्वा भानुनाम्ना कविना एषाकर्तृत्वेन बु
धुपास्ता रसमंजरी रसाः शृंगारादिस्तद्रूपा मंजरीवमंजरी प्रकाश्यते।
विशदीक्रियत इत्यर्थः॥ एतच्च प्रयोगस्तु एतावदर्थजातधारणसमर्थके 5

र्थके यथेप्रेक्षावतां शंकाकलंकपंकानास्कंदितया प्रवृत्तिं वक्तुं क्रियत इति वक्तव्ये
स्यकपोलकल्पितत्वप्रयुक्तानादरशंकाव्युदासार्थं प्रकाशपत इत्युक्तिः॥ अन्यापि रस
वत्या मंजादिमंजरी मत्तमधुकरमकरंदास्वादहेतवे सहृदयस्वरभिना विकाश्यते नापत
इति श्लोकार्थः॥ ननु मंजरीयं पस्पशाद्यात्मकतया कथं रसवत्त्वं। यतो रसो नाम वि
भावैरनुभावैश्च नरस्य व्यभिचारिभिः। नीतो रसः। स्थायि भावः। सदस्परसनिय
तामिति। सामाजिकास्तु स्तुजेहंतेरसानुपाचनरो मलइति विभावानुभावव्यभि
चारिसात्विकैः काव्योपात्तैरभिनयोपदर्शितैर्वा श्रोत्रपेरुकाणमंतर्विपरिवर्त
मानोरत्यादिस्थायिभावः स्वाद्गुणोचरतामानीयमानो रसस्तेन रसिकाः सामा
जिका इति श्रोत्रपेहकाणमेव रसवत्त्वं युक्तं न तु मंजर्या इति चेन्न स्यपं लोगलेजीव
नत्वस्यवघरेज्ञानस्येवचोपचारवृत्त्या रसवती न तु मुख्यतयेति। संबंधस्तु स्वसंवे
दनास्वाघमाननिर्भरानंदसंविद्रुन्मीजनहेतुरस्यादिनिष्पत्त्यनुकूलविभावनवि

षयी भवद्विभावादिसमर्पकत्वमेव। सच साक्षात्परंपरा साधारण्येन काव्यकरणभा
वत्वेन संबंधेन मंजरीकाव्यस्य वदित्यलमति विगहनावगाहनेन। हेतव इत्यत्र नि
मित्तकारणहेतुषु सर्वासां प्रायदर्शनमिति च तृतीया। विद्वान् विपश्चिद्दोषज्ञ इत्य
मरः॥ द्विरेफः पुष्पलिट् भृंग इति च। सजातीयगलेगोचरे देहोपकल्पितं चेतनि
तिविश्वः॥ अत्र मनोभृंगयोरभेदोपचारात् रूपकालंकारो ऽनुप्रासश्च श्लेष
श्चेत्यौजोगुणः गौडीयारीतिः भारतीवृत्तिः। एतेषां लक्षणानि तत्तद्ग्रंथादवसे ६
यानि विस्तारभियानेहोच्यंते॥२॥ ॥इति प्रयोजनं विकीर्षितं प्रतिज्ञाय सप
रिकरमभिधेयं निरूपयितुमुपक्रमते॥ ॥तत्रेति॥ तत्र तस्यामुपक्रांतायां मं
जर्यां रसेषु वीरादिषु शृंगारस्य प्रार्हितत्वेन पूज्यत्वेन प्राधान्येन लियावल्। त
न्वन्येषु हास्यादिषु रसेषु सत्सु शृंगारस्यैव कथमप्यार्हितत्वं। उच्यते शृंगारः
श्यामलः प्रोक्तः। शृंगारे सर्वमान्यत्वाद्विष्णुरेवाधिदेवतेत्यादिवचनबलेन शृंगा

॥रस्य परमेश्वरानुकारितया परमेश्वरदेवताकतया तस्य चातिप्रेमास्पदतया परमेश्वरस्म
रणविनिवेशितावतया चान्यत्र तद्भावेन शृंगारस्यैव स्तुत्यत्वं॥ ननु भिद्यीयते शृंगा
रः शुचिरुज्ज्वल इति। अन्येनाप्युक्तं। उज्ज्वलः शृंगार इति। तत्कथमुच्यते श्यामवर्ण इति
। सत्यं वर्णस्तु श्याम एव। वेषस्तूज्ज्वल इति। निर्मलत्वादुज्ज्वलेति वा। अत एव शृंगमुत्तमं
अरति५ पुरुषं प्राप्नोति अंतर्यामितया तिष्ठतीति शृंगार इति व्युत्पत्तिबलादुत्तमयुवप्रकृतित्वं शृं
गारस्योच्यत इति। यद्वा नाममात्रानुवादः सः। तदुक्तं भरतेन। आलोपरेण सिद्धानि ना
मानि शृंगारादीनीत्यास्तां विस्तरः। अस्तु प्रकृते किमायातमित्यत आह॥ ॥तदाल
बनविभावत्वेनेति॥ तस्य शृंगारस्यालंबनविभावत्वेन। अयं भावः॥ विभावो द्विविधः
आलंबनोद्दीपकत्वभेदात्। तथा च प्रतिपाद्यशृंगारालंबनविभावनया यस्माल
व्यरसउत्पद्यते स आलंबनविभाव इति लक्षणयोगान्नायिकानायकयोः शृंगारालं
बनविभावत्वाविशेषेप्यंतरंगालंबनविभावत्वान्नायकनिरूपणात्पूर्वं

नायिकानिरूप्यते॥ विविच्य प्रपंच्यत इत्यर्थः॥ तदनंतरं नायकमपि निरूपयिष्यामः॥
इदमत्र विचार्यते। कोसौ शृंगार इति। तत्र शृंगारतिलके शृंगारलक्षणं। चेष्टा भव
ति पुंसां यो यौ परस्परसुखानुरक्तयोः। स शृंगार इति तल्लक्षणस्था। यो भावो रसः स्मर
त इति स्थायी भावस्स रत्यादेरेव रसत्वात् चेष्टा न शृंगार इति। लोके परस्परचेष्टा
हेतु शृंगारपदप्रवृत्तिभ्रांत्या अरजतेप्याकारसाम्येन रजतपदप्रवृत्तिवदि
ति। किंतु स्वोचितविभावानुभावव्यभिचारिसंयोगात् स्वदस्थेर समाना रतिः शृंगा
र इति। इयं च रतिर्यदा तरुणतरुणीसंगमसमुत्कंठासम्मीलिता सती वि
भावादिभिरतिर्व्यज्यते। तदा शृंगारपदप्रवृत्तिपदवीं प्राप्नोति। अन्यत्र केवलं रति
रेवेत्यवगंतव्यं। यत्तु नरसलघुदीपिकायामुक्तं यत्र परस्परमनुरागस्तत्रैव
रसः। केवलस्य पुरुषस्य केवलायाः कांतायाः अनुरागे रसाभासः। यथा सीता
यां दशमुखस्येति। तन्न विचारचारु। स्वमदनायां नायिकायां उन्मदवस्यायां न। ८

यकस्य विप्रलंभभावप्रसंगात्। यथा। उन्नताकोपपरा स्फुरद्वा निशि मया स्वप्नेषु
दृष्टा प्रियामामा संस्पृश पाणिनेति चकिता गंतुं प्रवृत्तात कः॥ नो यावत्परिर
भ्य चाटुकशतैराश्वासयामि प्रियां भ्रांतस्तावदहं शठेन विधिना निद्रादरिद्रीकृ
त इत्यादौ नायकस्य नायिकाया गुणश्रवणादिना उन्नते विप्रलंभे रसाभावो
त्पत्तेश्च। यथाहंसेन दमयंती सौंदर्यादिगुणवर्णनप्रस्तावेन नलस्येति। ननु
तर्हि सीतारक्षकनक्तंचरनिन्नहृदयः स्वस्यो नलंकेश्वर इत्यादेः का गतिरिति चे
न्नस्त्यं पश्चात्तापमात्रे तन्न तु विरह इत्यलमतिगहनावगाहेन। अथ का नाम ना
यिका। शृंगारालंबनविभावेति चेन्न नायकेऽतिव्याप्तेः॥ तस्यापि तदालंब
नं विभावत्वादिति उच्यते॥ प्रतीयमानपुरुषत्वानधिकरणत्वे सति शृंगारालंबन
विभावो नायिका॥ इदानीं नकाप्यति प्रसंगः। यथा कलावती कुवलयदामकोम
लाम मदालसा मनसिजरंगमंदिरं। परिस्फुरच्चपलचकोरलोचना लुलोचना हर
ति न कस्य धीरतामिति। इह किंचित्तु गं पानिधानं दृतंतव्यं। अनुसंहितमुपरि

ति। सा चेति॥ सा पूर्वोपदिष्टा नायिका त्रिविधा त्रिभिः प्रकारैर्भिद्यत इत्यर्थः॥ तानेव
प्रकारानाह॥ ॥स्वकीयेति॥ स्वस्योढा स्वा। स्विकि कत्रत्ययेतदंतात् हृदित्वात्प्र
त्यये सिद्धमिदं। ऊनपराभ्यां कुक् चेति परशब्दात् छप्रत्यये कुगागमे परकीयेति सिद्धं।
२४ सामान्ये सामान्येति चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ्। सकलपुरुषानुरागवतीत्यर्थः।
तदुक्तं शृंगारतिलके। स्वकीया परकीया च सामान्यवनिता तथा॥ कृत्वा कलाप्र
शालास्ति स्त्रस्तस्येह नायिका। इति॥ ॥तत्र॥ सा स्वीया यां तं प्रति प्रेम जायते पुण्य उ
कारिणः। आपन्नं वा विपन्नं वा वक्त्रं यानुसेवते। सा स्वीया जन्मतः पूर्वपुण्य
पुंजप्रसादतः। अहो तेषां महाभाग्यं मृत्युलोकनिवासिनां। दुर्लभं तेजसादिदेवानां स्वी ६
या पोरूप भुज्यते। यस्याः प्राणप्रयाणेपि पतिः परमदैवतं। तामनादृत्य कः काममन्य
न कुरुते रतिमित्यादि अभियुक्तवचनप्रामाण्यात्पूर्वजन्मकृतपुण्यपुंजप्रसा
दलभ्यतयेंद्रादिदेवनामपि दुर्लभतया सर्वोत्कृष्टतया तत्कीर्तनस्यातिनिः
श्रेयःसाधनतया प्रथमोद्दिष्टं च प्रथमं स्वीयालक्षणमाह॥ ॥तत्रेति॥ तासु पू
र्वोद्दिष्टास्वित्यर्थः। स्वामिन्येवानुरक्तेति। विधिवत्परिणीतमात्रोदरप

सुरतानुकूलविद्यमानात्। यस्तानुरागवतीत्यर्थः॥ अन्यपुरुषाप्रसक्ती पुत्रादौ स्नेहानुबंधित
या स्वाम्यतिरिक्तानुरागाभावस्तत्र केवकारश्चेतरसंभवः स्यात्॥ तच्च यत्राग्रेऽनुरागोऽभ
वी तत्र विघ्नत एव एतेन युक्तं। स्वामिन्येवानुरक्ता स्त्री येति लक्षणं॥ तत्र मुग्धा या मध्या या
मध्या या खंडिता या कलहांतरिता या मवास्तेरिति केषांचिद् दूषणं निरस्तं वेदितव्यं। तत्रा
प्युक्तं। लक्षणार्थे सत्वादिति दिक्। एवकारव्यावर्त्यमाह॥ न चेति॥ न व्यापारान्नाह॥ अस्या
इति। पूर्वलक्षणलक्षितायाः स्वीयाया इत्यर्थः॥ चेष्टा व्यापारः॥ व्यापारमाह॥ भर्तुरित्यादि
ना भर्तुः स्वकांतस्य शुश्रूषा पादसंवाहनादिरूपा। शीलस्य पतिव्रताविहितसद्वृत्तस्य संर
क्षणं चमनुष्ठानं॥ आर्जवं ऋजुपता॥ क्षमा क्षांतिः॥ तामेव चेष्टां मुग्धाहरणमुखेन दर्शयति
॥यथेति। चेष्टास्तु चकप्र किकालुष्यं प्रपद्य प्रस्फुरत्कृपयत इति यथाश्च र्थः॥ एवं सर्वत्र दे
यं। पद्यमेव पठति॥ ॥गतागत इति॥ कुलवनितानां नयनयोर्गतागतं कृतलक्षणं अपांग
वधि। नतेन नम्रेण वपौ यासां तां नतभ्रुवः कनकजननीदर्पितकुलोपजा दीननतभ्रुवस्ता
सां कुलवनितानां पातिव्रत्यधर्मेप

रायणानांकामिनीनांनयनयोर्लोचनयोर्गतागतकुतूहलं॥गतंचतदागतंचेतियावतापातादि
वत्॥कृतापकृतादिवत्कर्मधारयोद्वन्द्वः॥तदर्थश्चगमनसहचरितमागमनंमुहुरभ्यसमान
शक्तिस्वाभाव्यात्प्रतीयते॥तथाचगमनसहचरितमागमनंकौतुकमपांगावधि।सर्वथाक्व
चसाधारणंभवतीतिःअपांगाश्चक्षुषोरेवनेत्रप्रांतावधिकृतमेवनतुकर्णांतावधीत्यन्यावधित्वंनि
षिध्यते॥ननुकशब्देनकुसुमचापकोद्याकारानुकारतयाभ्रकुटीनामतिरमणीयत्वेनकु
चितरंगितादिसप्तप्रभेदभिन्नविकारहेतुत्वं।कुलशब्देनतद्वतीनामपितासांतद्भिन्नव्य
तिरेकोबहुवचनेनचानेकस्याएवेयंरीतिः।किंतुसर्वासामपिकुलस्त्रीणामितिव्यज्यते।
कटाक्षश्चापि।स्वातंत्र्येणवधूनांतत्परवशतयालोचनयोर्विषयांतरग्रहणंभज्यते।नय
नयोरितिकर्मणिषष्ठी।कर्तृव्यापारस्वरूपेवर्तत्यतदेवोपोद्बलयति॥कुतूहलशब्दश्चयो १
गस्यकौतुकेनयातायातकारिणोर्नयनयोर्मध्यतएवपरावृत्त्यभावमन्यत्रगमना
भावंचसूचयति॥कुलनतकवाभित्येतत्सर्वत्रसंबध्यते॥स्मितंहसितमधरएवविश्रा
म्यतिविश्रांतियाति।ननुतमतिक्रम्यगच्छतीत्यर्थः॥स्मितपदमौष्ठिकसितेर्गदितैःकरा

दैःसोपवाचितेः॥आकुंचितद्विजाधरमुत्तमानांस्मितंभवेदित्यादिलक्षणयोगान्नायिकायाउ
त्तमत्वंव्यनक्ति॥अधरपदेनचनधरतीधरःइतिव्युत्पत्त्याधारणायोग्येपितत्रस्थित्याकुलल
क्ष्मीतस्यमहिमाव्यज्यते॥तिष्ठतीत्यपहायविश्राम्यतिपदप्रयोगस्त्वधरस्यामृताधरत्वेनपरमा
नंदसंदोहसंपादकत्वंवक्तुं।एवकारोभिन्नक्रमःश्रुतेरित्यस्यानंतरंद्रष्टव्यः॥तथाचवचोवच
नंप्रियतमश्रुतेरेवनायकश्रवणस्यैवातिथित्वंश्राव्यमित्यर्थः॥तावतैवप्रयत्नेनवचनं
यदतियावताप्रियतमश्रवणगोचरतांप्राप्नोतीतिभावः॥वचइत्येकवचनंबहुप्रलपना
भावेवचर्यवस्यन्नायिकायाअनौद्धत्यंसूचयति।अतिथिशब्दस्तुसंपूर्णवेदाध्ययनशालिनि
कस्मिंश्चिदतिथौगृहमागतेमनस्विनःसंतोषोभवतीतिलोकरीतिमंत[?]र्लयन्त्याश्रव
णमात्रेणसंतोषसंपादकतयातद्वचसोनिष्ठुराचारत्वेनसुश्राव्यत्वंप्रतिपादयति।कदाचि
दपिसदाप्रसन्नमनस्कतयाकेनचित्समयविशेषेणेत्यर्थः॥कोपक्रमःकोपोद्गमःश्चेत्तथ
केवलंकार्श्न्येनमनसिस्फुरितमकृतिनिलीनोभवति।नायकापराधदर्शनाद्दोषदूषितोपिको
पेविवेकितयामनस्येवनिलीनोभवतिनतुलेशमात्रंनिष्ठुरादिभाषणेनबहिराविर्भव

लीति भावः॥ क्रमपंचरचोकुसमात्रे पर्यवसन्नकार्या समाप्तिं द्योतयति॥ मकृतीत्यनेन पुनरुज्जी
वनाशंकाभावः॥ अवधिशब्दस्त्वरुह्यलिंगः॥ अपांगो नेत्रयोरंतावित्यमरः॥ यकमकानुप्रासस्व
भावोत्याद्यो ऽलंकारः॥ पांचाली रीतिः॥ शृंगारावस्थानस्तु चिंताकौशिकी वृत्तिः एतेषां
लक्षणानि तद्रूपादवसेयानि। न चतत्तोत्र लेखनेन किंचिद्विशेष इति नोट्टंकितानि। रथो
द्धरः। लक्षणं तु रसौ रसयवला वसु ग्रहदृपतिश्च रथोद्धतेति॥३॥ ॥एवं सामान्यतः स्वीया
मुद्दिश्य तद्भेदानाह॥ स्वीयेति॥ तदुक्तं॥ मुग्धा मध्या प्रगल्भा च स्वकीया त्रिविधा मतेति॥ तत्र
सर्वेषां रहस्यापेन बहुवक्तव्यत्वात्प्रथमोद्दिष्टत्वाच्च प्रथमं मुग्धालक्षणमाह॥ तत्रेति॥ तात्प
र्यः॥ अंकुरितं संजातांकुरं प्रकरनायोन्मुखं यौवनं तारुण्यं यस्याः इति समासार्थः॥ उत्प
द्यमानयौवनेति यावत्॥ एवं च परकीयासामान्यवनितयोर्यौवनस्योत्पन्नत्वेन पद्यत्रापितले १०
न वृद्ध्यमानत्वाभावादंकुरितपदेन नातिव्याप्तिरिति लक्ष्ता। अथ मुग्धाया अपि स्वलक्ष
णविभागमाह॥ सा चेत्यादि स्पष्टमवुद्धनवोढेत्यंतेन॥ अज्ञातमनवगतं यौवनं यस्याः यथेति
वा एवं ज्ञातयौवने त्यत्रापि ज्ञेयं। अंकुरितत्वसफुरास्फुरसारल्पेनोभयसंभवेयुक्त

एव विभागः॥ सैव ज्ञाताज्ञातयौवना मुग्धैव॥ ज्ञाताज्ञातक्रमेण लज्जाधाष्ट्याभावः॥ भयं संभो
गापरिचयेन तद्दुःखनाशंका एतदुभयप्रधानरतिमती सामादिप्रयोगेण नत्री अभिनवमू
ढा संभोगविषयकनानाव्यापारं अपि ता नवोढेति व्यपदिश्यते इत्यर्थः॥ लज्जाभयप्राधान्य
रतिमत्त्वं च विशेषणं ज्ञेयं। सैव लज्जाभयपराधीनरतिमती ज्ञातयौवना ऽज्ञातयौवने वक्र
मशो यथाक्रमं सप्रश्रया प्राचीनसमागमानुरक्ता नंदांकुरास्पन्नविश्वासा पि कांतभया
सती प्रचुरतरलज्जा प्रयुक्तगात्राकुंचनवती विश्रब्धनवोढेत्युच्यते इत्यर्थः॥ इदं तु प्राचीनै
रतिसंदतया विविच्य न दर्शितं॥ अनेनतु स्वबुद्धिकौशलं दर्शनायोपदर्शितमिति बोद्ध
व्यं॥ तद्व्यापारानाह॥ ॥अस्या इति॥ पूर्वलक्षणलक्षितायामुग्धाया इत्यर्थः॥ व्यापारा ना
ह॥ कृपेति॥ सुरतविषयकलज्जया मनोहराः कदाचाकेनोपायेन पंसुरतानुकूला भवेदि
त्यहर्निशं विचारणयातत्रासक्तं चित्तत्वाद्ध्रियमाणसहारिणी सुंदरेतिवा। अत्र सुरता
द्यन्यत्र लज्जाभूषणं स्त्रीणामित्येन तन्मुग्धाव्यतिरिक्तनायिकाविषयमित्यवगंतव्यं॥ कदा
चिच्चिंताव र्जनसमये ऽशक्यत्वेन भर्तुः कोपोदये मार्दवं मृदुलानत्तुपारुष्यादि भाषणं॥ य
द्वा दयितापराधदर्शनात्तस्यैव कोपोदये मार्दवं अल्पापने यत्पर्यः। नवविज्ञापने समीह॥

र.टी.श्री.

कोपास्थिरत्वेन अभिनवनानाभरणधारणं छेत्यर्थः॥ इदानीं मुग्धादिषु द्विविधनायिकानां क्रमेणोदा
हरणानि वक्तुं तदनुवादपूर्वकं प्रथमो द्विविधमुग्धोदाहरणमाह॥ मुग्धेति॥ आकृतमिति॥ का
मदेवधरणीपालेन एणीदृशस्तनौ वस्तुं तारुण्यं आकृतमिति संबंधः॥ कामश्चासौ देवश्चस
चासौ धरणीपालश्चेति समासः॥ स्वकंका कामः कामनाविषयः॥ कमनायोवादेवो
युगपत्त्रिलोकीविजिगीषारसिकः॥ धरणीपालः स्वतंत्रः तेन एणीदृशा श्यंचललोचना
यानायिकास्तनौ शरीरे वस्तुं वा संकर्तुं तारुण्यं विविधोन्मादसाधारणं कारणमाकृतं
त्वमत्र तिष्ठेति बुद्धिपूर्वकं नियुक्तमित्यर्थः॥ कामपदं च सोपदेशाधिपतिः सत्तत्र स्वीयं नियुंक्त
इति लोकरीतिं कामिनीतिव्युत्पत्तिपर्यालोचनया अंतर्णयति॥ कामधरणीपालेनेत्यो
तावतैव तदत्राभेदेव पदोपादानेन आज्ञायाः अनुल्लंघनीयत्वं सूचयति॥ धरणीपालपदं ११
त्वेतदेवोद्बलयति॥ अतिसौंदर्यसूचकेन एणीदृशा इति पदेन वस्तुः सुखहेतुता सूचिता॥
अतिविशालेऽरण्ये हरिणादीनां वासः पतनादिभयेन दुःखाय भवतीति शरीरादिपदमपहाय स्त्र
तिविस्तृतेन वीने पुनः सुखायेति सूचयितुं तनावितिपदं॥ मध्ये समनेह समवस्थानं

कुपरस्ततः प्रयोगः॥ गृहादौ वासो हि सुमुहूर्तेवास्तव्येवोध्यः॥ सुरभिमंत्रणादद्रूपको भव
तीति तदाह॥ शुभेकाले सुमुहूर्ते वास्तुविधिगृहप्रवेशनिमित्तोक्तस्तं भवंत्वादिदेवतापूजा
विधास्यति। करिष्यति सतीत्यर्थः॥ दृष्टाः खंजरीटवेत्यर्थः। वदनकांत्याहिमांशुसंबंधा
ह्लादहेतुर्लावण्यविशेषः॥ किं च शश्लोष्याख्यातपूर्वः॥ गिरा पीयूषसागरवीचिसौंदर्य
आमंत्र्यत इति सर्वत्र संबध्यते॥ तारुण्येन तत्रास्थितिर्विधीयतेइति नवद्गुरस्यागत्यत १४।३
त्रस्थातव्यमिति आकार्यत इत्यर्थः॥ किमुनोदिता॥ त्रिपहिताथस्ततः ललिनो भवंतिसु
हृदः सुलतामित्यादि स्मरणेनोदितानामपि दृष्ट्यादीनां युक्तमेव निवेदननिमंत्रणं॥
एणीदृशाइत्यनेनैव विराजत्वप्रतीतावपि खंजनचातुरीतिपदेन विततनीलिम
कटाक्षावलोकनं चनयनयोर्व्यज्यते॥ तेन चासौ किंकचमत्कारकारिता व्यज्यते॥
सहजचंचलत्वादिगुणयुक्तस्यापि मुखस्याह्लादकत्वं व्यज्यते॥ लावण्यमित्यनेन च गिर
मंतः स्मितज्योत्स्नात्वं व्यज्यते॥ खंजनचातुर्या। दृशां तारुण्यप्रवेशात्प्रागनुपलब्धे
स्तत्प्रवेशोत्तरं चापलजध्वे सारूप्य खंजनचातुर्यतोरनां कार्यकारणभावः। तारुण्योद

र.टी.

येनेत्रादौ सौदर्यविशेषो भवतीति वस्तुगतिः। यद्वा कामधरणीपालेन अनेकालेवास्तु विधिं वि
धास्यतीति हेतोस्तारुण्यमेणीदृशां स्तनौ वस्त्रमाहुः समितिशेषः। अध्याहारेण यथा कथंचिद्यो
जनीयं। शिशुत्वं सर्वं पूर्ववत्। किलेतिस्त्र सिद्धं। सा स्वभावतो हेणीदृकृतत्रापि पुनः कंदर्पोक्ता
तत्तारुण्यवसतौ नत्रावल्पं वक्तुं न शक्यत इति समुदायतात्पर्यं॥ आक्रांतमिति। क्रांत
वबोधन इत्येतस्माणि चिपुकिर्मितात्क्तः स्वत्वे निष्ठायां यस्य विभाषेतीट् प्रतिषेधेण रति
रितिणिलोपे सिद्धं। वस्तुमिति। वसनेस्तुमनि अनिरूत्वादिड्भावः॥ प्रथमयोजनायां वि
धास्यतीति शब्दं त्रंतं। द्वितीययोजनायां लंटंतं॥ चातुरीति चतुरशब्दात् ष्यञि षिद्गौरा
दिभ्यश्चेति ङीषि षस्येति चेत्यकारलोपे हलस्तद्धितस्येति यकारलोपे सिद्धं। सौदर्य
रीतितितस्येदमित्यणि रिङ्कणमीति ङीप्॥ माधुरी चातुरीवत्॥ मुक्ताफलस्यच्छाया १२
ग्रास्तरलत्वमिवांतरा। अतिमातियदंशेषु तदेवावण्यमिहोच्यते। इति लक्षणं॥ काव्य
लिंगनिदर्शनेऽलंकारो वृत्त्यनुप्रासश्चशब्दालंकारः। शार्दूलविक्रीडितं छंदः॥४॥ ।ए
[illegible]मामान्यतो मुग्धामुग्धकृत्य तद्रूतान्विप्रलब्धनवोढेत्यं तेनोदाहरंति॥ ॥अज्ञातयौवनायथेति॥

नीरात्तीरमुपागतेति॥ पानीयात् सरस्समीपमुपयाता इंदुवक्त्रा काचिन्नायिका। मर्यादायां विश्रांतच
क्षुषोः कर्णयोः किमिदं नीलोत्पलं संबद्धमिति बोद्धुं कर्णे करं करोति॥ नीलोत्पलनेत्रयोरेकवर्ण
[illegible]कांतत्वात्संचितर्क इति भावः॥ करणं कर्णादि ब्रुद्धिपोषकांत्वात् श्रोत्रशब्दस्तन पौनरुक्त्यं।
जलजनीलीत्ररोरूप्रमेणरे मोहमश्रेणीं आघ्रति॥ स्पर्शतीत्यर्थः॥ रोमोद्गमशो वालयोरेकवर्ण
त्वादि भावः॥ आंतास्मितीति सखी सहचरी मुहुः एघति॥ हृच्छांकरोतीत्यर्थः॥ अविज्ञातनितंब
नारायतः॥ ऊर्व्वोर्गाहनमनोदयइति भावः॥ अंकुरपदं चोद्गममात्रे पर्यवस्य [illegible]भावस्या।
असंदर्शनं तो द्योतयति॥ अतएव शांकापि संगच्छते॥ शाद्विमुखीत्यनेन निरतिशयसौदर्यादि
गुणत्रभावः॥ त्रो उत्तला तिडच्छावचयनेधातुःश्चेरि रूपं॥ अविदितमिति विदज्ञाने अस्मा
त्क्तप्रत्यपरतिसिद्धं। नचविभाषागमहनविद्विशामिति त्सनेनविकल्पेनत्रिविधानिश
यां यस्य विभाषेतीट् प्रतिषेधात्कपमिदितिवाच्यं॥ आदितश्चेति योगविभागेन यदर्थस्य
विभाषातदर्थकस्य प्रतिषेध इति ज्ञापितत्वात्॥ ततश्चात्र विदिता तोरादिकेन सारूचर्या
[illegible]नार्थस्य विदेर्ग्रहणं तु ज्ञानार्थकस्य यस्य विभाषेति प्रतिषेधाभावइति चिरंतनः प्र
याः अहुना आदादिकेन सारूचर्यादादिकस्य ज्ञानार्थस्येच ग्रहणमिति वैपरीत्यस्यापि
वक्तुं शक्यत्वात्॥ विनिर्गमना विरहान्त किं चिदेतत् नच शब्दपरं विप्रतिषेधएवनियामक

इतिवाच्यं॥ अस्यऽसार्वत्रिकत्वात्तवस्तुतस्तुउक्तौ छेदनइत्यस्यइदिकरणत्वेनगात्
यस्यविभाषेत्यस्यसिद्धत्वनित्यत्वेननिषेधाभावोबोध्यः॥ यद्ययंविधिर्नित्यः स्यात् स
ञ्चिचीत्यनेनविभाषितेहत्वादनेनैवनिषेधस्यसिद्धत्वात्दादिकरणमपार्थकं स्यादि
तिदिक्॥ उत्तनालीतुशैवालमित्यमरः॥ भ्रांतिमत्संशयावलंकारौ॥ गौडीयारीति
वृत्तिस्तुकैव॥ शार्दूलविक्रीडितंछंदः॥५॥ ॥कस्याश्चिद्दूत्याः कयाचित्तत्कृत
द्विवाहोत्तरकालंप्राप्तस्तरव्या यादेशांतरस्थित्या अदृष्टतद्धर्मकाया अग्रहातत्कृत
निशंकेताया समयविशेषवशेनप्राप्तनिकेतनायाआत्मवत्सर्वमतानिइत्तिद
शास्वत्रुसंजगरव्विलंपश्यंत्याविद्दितयौवनायासमासाद्दितयौवनांचारभ
वनावस्थितांतामेवप्रतिपरिहासपूर्विकाभणितिः॥ ॥स्वयंनरिति॥ हे अं १२
नोजलोचनेराजीवनेत्रे। स्वयंनः कारणजन्यः शंभुः सुष्ठुरयहेतुस्तेपयोधरो
नवत्याः स्तनः कस्यधन्यस्यनखेनचंद्रचूडोभविष्यतिकस्तेपतिर्भाग्यवान्वर्त्त
तेयस्यकररुहेणचंद्रशेखरतामेष्यतीत्यर्थः॥ नूनंतेननज्ञातास्त्वीयमवस्थाऽन्य
थाएतावताकालेनागत्यनखकृतदानेनचंद्रशेखरतासंपादितास्यादिदानि

मपिकदागत्यतत्संपादनेनस्वात्मानंधन्यतांप्रापयिष्यतीतिनजानेइतिभावः॥ यस्यतेपत्युः
कररुहेणचंद्रशेखरीभविष्यतीतिनिंनामासइतितन्नामप्रश्नपरोयंश्लोकः। चंद्रचू
डोप्युक्तविशेषणविशिष्टः। एतेनकेनचिद्ज्ञानविज्ञंभितधियांकिमुराट्स्साधार
णत्वाचितया अनेकमर्त्त्यकस्यापकत्वेनास्याश्चस्वकीयात्वेनासंबद्धमुदाहरणमित्या
शंका निरस्ता। स्वयंनरित्यनेनस्वयंजाततयालोकोत्तरलावण्यभागित्वं। पयोंतर
पर्यालोगेनपयोधरइत्यनेननधरोऽधरः पयसः अधरः पयोधरइतिव्युत्पन्नेनान
पत्यस्त्वचकेनकुचयोः काठिन्यतेदृण्याग्रत्वघनोच्चतरत्वादिगुणशालित्वं। नखेने
त्यनेनाईचंद्रशेखरसंपादनयोग्यता॥ धन्यस्येत्यनेनसंचितसुचरितपौरीपाकत्वं
चंद्रिनाकुदकत्वं। चूडेत्यनेनसौंदर्यंव्यज्यते। पयोधरपदेनास्याअप्रस्तुतयाक
यमन्वयिपयोधरत्वमित्यादिशंकापयोनधरतीनत्रवीमिकिंतुअस्फुरतयाधरतिलक्ष
लोचनपानिरसनीयम्। स्वयंनरितिच्छिशशंनर्वस्यत [redacted] नेत्यपांदुवतेर्मितं
डादिभ्यउपसंख्यानमित्युप्रत्ययेसिद्धं॥ यथाशान्तेल्येतादन्योन्योपिइतिशंशम्

यिता॥ कालादिरोगगणां नवली तिशं नुः शं नवत्यस्मादिति शं नुदिति व्युत्पत्तिरपादा
नेऽप्रत्यय नवाचीत्येति माधवः॥ चंद्रचूडायाम स्येति कंठेकालो अस्यास्तादेवैय
धिकरणेपि समासानुशासनात् गमकत्वात्समासः॥ विचारविशेषस्तु आकरेस्फुर
इति नेह प्रोच्यते॥ चूडाशब्दस्य सप्तमी विशेषणे इति हर्षं निपातेप्राप्तेगड्वा
दिस्यः परवचनमितिपरनिपातः॥ गड्वादयः प्रयोगतोऽनुसर्त्तव्या इति मिश्राः॥
व्यतिरेकानुप्राणितः समासोक्तिरलंकारः॥ प्रसादोगुणः। गौडीयारीतिः॥ वृ
त्तिस्तु कैव। वृत्त्यनुप्रासश्च शब्दालंकारः॥ न च वर्णसाम्येपि स्वरसाम्येकथमनु
नुप्रासत्वमिति वाच्यं॥ स्वरसाम्यस्यानियत्वेन व्यंजनसाम्यनैयत्यादित्यल १४
मतिप्रसक्त्या॥ ८॥ हस्तेधृतेति॥ न केवलं मुक्तैव किंतु करे धृतापीत्यपिशब्दा
र्थः॥ न ह्येतावन्मात्रं किंतु तल्पेऽवस्थापितेत्यपिशब्दार्थः॥ न ह्येतावतैव विश्रां
तास्य ह्रीः धृता किंतु भुजांतरे धृतापीत्यपिशब्दार्थः॥ ततस्तसर्वं मवगणय्यक्रम
तो लज्जा नयपराधीनतया नवोढा रहसि नातिक्रम्यबहिर्निर्यातुमुद्योगं कु
रुते॥

ततएवं संप्रतीमः॥ यश्चापलं हस्तेन स्थिरीकर्तुं दृढो भवति तदाक्रमणयोग्या भवेदित्यर्थः॥ इदं त्वसंभावितामि
तिभावः॥ क्रोडो भुजांतरं इत्यमरः॥ तल्पोस्त्रः॥ स्तृतमपारतइति च॥ अत्रापिपर्णिपारंत नोति तपतेवा
पारतइति क्षीरस्वामी व्याख्यापर्यालोचनया पारंतमिति पठनीयमित्याभाति तत्वं निपुणः पश्यतः स्वभा
वोक्तिरलंकारः॥ वसंततिलकावृत्तं॥ ७॥ ॥ हस्तेमुकुलितेति॥ ईषत्संकुंचनभावं प्रापितेन यनपांभोय
च यस्यां क्रियायां। तथा करांशुके ग्रंथौ निश्चलीसतः हस्तो यत्र यस्यां तथा सतः स्यादितरुरुयुग्मस्य बंधः
परस्परं संश्लेषो यस्यां। तथा हस्ताच्छन्नपयोधरस्थानं यथा भवति तथा॥ नवा। कामिनी कस्यत रुणस्यनि
करम्भ्यागोल्पनि द्राती त्यर्थः॥ लज्जितेपंद्रष्टः॥ न मुकुलितात स्यास्तेजोद्दुः प्रेक्ष्य वस्तु निसेनवात्
लज्जिता लज्जाणंतु। मन्दारागं चितपश्यमाचं किंचित्स्तब्धकनीनिका॥ संस्रस्तो ऽद्गुपुटाहृष्टिर्लज्जि
तास्त्रिय इति। इषदर्थे दरमपमिति विश्वः॥ नारीकरांशुकग्रंथो नावीस्यादिवेउयंती॥ स्वभावोक्ति
रलंकारः॥ पुष्पिताग्रा वृत्तं॥ त्रिरंस्यपणे॥ ८॥ ॥ एवं मुग्धां सपरिकरां निरूप्य क्रमप्राप्तां मध्यां
निरूपयति॥ ॥ समानेति॥ समानौ न्यूनाधिक बलवत्वाभावेनोपरूढपरस्परविरोधौ लज्जा
कामदनौ यस्याः सा मध्येत्यर्थः॥ एवं चेत्यादिसंकोतरमस्या नवोढभेदकथनं। तेनयद्यपिए
षैवेत्यादि कश्चित्साहः॥ तथापि सचासंभवादनुदाहृतत्वाच्चोपपादइति केषांचिद्दूषणमप तर
लग्नकं वेदितव्यं। तल्पापारानाहृ। अस्याइति। सापराधेव धेत्रनेकुचस्पर्शादिचेष्टायो धैर्यगुणयो
हृ

गेसति कुटिलभाषणवतीत्यर्थः॥ सापराधेवल्लभेऽधैर्यगुणयोगे चेष्टाकरणेऽयोगे सतिनिष्ठुरभाषण
वतीत्यर्थः॥ ल हितां मध्यामुदाहरति॥ ॥मध्यायथा॥ स्वापइति॥ स्वापेनिद्रायां प्रियस्यातिप्रे
मास्पदस्याननावलोकनहानिर्खेस्यादिति संभावयंती तिभावः॥ स्वापश्रुतो निद्रात्यागे प्रियस्यत्रि
यकरकंकरेणस्वात्मग्रहणमुपादानंमुपगूहनमिति यावत्। स्तस्यसंगः स्तरवसदृति सामर्थ्य
लभ्यं।कंदर्पोद्रेकवशात्प्रियमुखावलोकनमवसरविशेषमन्यमानानिद्रादरिद्राप्नोतत्नाशाऽवसा×
रःस्यात्।लज्जात्यागेनेतदनुमोदनेस्वरूपहानिरेवानिष्टंस्यादितिमन्यमानाइत्यर्थः॥ मधुमनुना
प्रकारेणविचारयंतीकमलवदना निःशंकत्वमपित्यक्तुमपित्रपेदे॥ परस्परविरुद्धकार्यद्वयोपस्थि
तौएकमपिकर्तुमपारयंतीत्याकुलाबभूवेत्यर्थः॥ प्रियकरस्यग्रहणमेतावतैवसिद्धेत्रसंगत्रंदंयथा
कथंचित्संगस्यविद्यमानत्वात्प्रसंगः संगः प्रसंगः इति व्युत्पत्त्यागाढाश्लेषेविश्रांत्याति।संदेहालंका
रः।वसंततिलकावृत्तं॥२॥ अथविशिष्टप्रगल्भां निरूपयति॥ पतिमात्रेति॥ ब्रह्मादिविरोधेः परित्यक्त १५
कर्तापतिस्तन्मात्रविषयिका केलिःक्रीडा तस्याः कलापोरचना तत्रकोविदा कुशलाप्रग
ल्भाप्रगल्भेतिव्यवहारवतीत्यर्थः॥ पतिपदव्यावर्त्यमाह॥ वेश्यायामिति॥ मात्रपदव्यावर्त्य
माह॥ कुलटायां चेति॥ नातिव्याप्तिरितिनिस्तंबंधः॥ मध्येहेतुः॥ पतिमात्रविषयत्वाभावादि

तिवंडकचेष्टामाह॥ अस्यास्त्विति॥ तुशब्दः पूर्वस्माद्वैलक्षण्यद्योतकः॥ सागसिइत्यादिसर्वं। अयमपरो
विशेषः संभोगासक्तिः॥ तदानंदसरव्याद्युपदिष्टवाक्यविस्मरणं चेत्यर्थः॥ संभोगासक्तिमुदाहरति। प्र
थमायथा। संस्पर्शेति॥ स्तनंसंस्पृश्य स्तनमर्द्दनंविधाय।मुखमुखमाकलय्य चुंबनंदत्त्वास्वमुखेनसं
योज्यकंठस्थलंकृत्वा आलिंग्य। अधरबिंबपानं विधाय। परीधानीयंपरिहृत्य। अलकंकेशपाशंउहृत्य
उत्क्षिप्य अंबुजिनीपतेः कमलिनीनाथस्यदेवस्यसूर्यस्यसंमुखंयंउदयाचलशिखराश्रयणे। नदिवा
मैथुनंकुर्यादितिनिषेधादथ्यंतरायमेतंप्रियेवक्त्रे नेजिह्वासमाने ज्ञातुमुद्योगं कृतवतिसति।वामाक्षी
नायिकावसनांचलैः। वस्त्रप्रांतैः कर्णावतंसी नीलनीरजकमलंनिहृते स्थगयतीत्यर्थः॥ एतत्कमल
स्यस्तवं पीतयाविकाशदर्शनलिंगेनसूर्योदयानुमितिमाकरोत्विति धियेतिभावः॥ यद्वावस
नांचलैः।नीलोत्पलं निहृते। नैतन्नीलकमलपत्राणि किंतुवसनांचलाइति तानपलपतीत्यर्थः॥ वामे
वक्रेअक्षिणी यस्याः सेतिव्युत्पत्त्यानेतानिकमलपत्राणि किंतु मदद्दिकराद्रसंबद्धावसनप्रांताइति
तानपलपतीतिवा। स्तनयोरितिवक्तव्येस्तनमितिकर्मार्थविभक्त्यास्तनस्पर्शस्यरणादिवन्त्वा
नि छास्तनः किं। वीप्सितनमत्वेनबुद्धिस्थंस्तनमितिव्यज्यते॥ एकवचनेनातिनिबिडतयाएकीभा
वः॥ [redacted] स्थलपदेनोच्चावचत्वन्यतयागाढाश्लेषः। बिंबपदेनपानासक्तिः अलकमित्येक

वचनेन केशानामेकीभावः॥ देवइत्यनेन उदितरव स्वर्येन मस्करणीयता। अचलैरितिबहुवचनेन सर्वपत्री
तर लंघिकारितस्यएकवारं द्विवारं वो चलाच्छादनेन नाच्छादितं भवतीति नपोनः पुरुषे। भोलयपदेन पांडुगं
डस्थलशोभो त्कर्षः। गंडस्थले संस्थिव्यिति दुग्धजलाभिधानमेलक्षलिंगनं। तदुक्तं। अंकेस्थितो त्व
शयने मृगशावकाक्षी गोत्रे प्रियस्य विश। तीव्रविलांतरागात्। गाढोपगूहनवशेन निरंतरं य संश्लेष
माकुरिति दुग्धजलाभिधानमिति। संस्पर्शेत्यादि पूर्वार्द्धं नायकोत्कंठार्थं। अभ्यंतररं तारं भस्य
बाह्यरतपूर्वकत्वात्॥ उक्तंच। मोहनं नरेनेत्ता बघावभोत्कंठिला प्रिया॥ अन्यथा नसुखोत्प[illegible]
त्तिरशीते ऽर्धकराइवेति। इत्यपरि आहोरतं बाह्यमेवप्रयोज्यं तत्रापि चालिंगनपूर्वमेवेति।का
मतंत्रात्। आलिंगनपूर्वतैव। स्तनस्पर्शादीनां वक्तुं युक्तं। तथापि नपरस्परं पूर्वकाल[illegible]ना। किंतु अ
भ्यंतररतापेक्षयैवसदोषः॥ अधरे बिंबमेवेति रूपकं। निःपीयेति पीङ्‍ पाने अस्मात् क्त्वा[illegible]योल्य
बादेशो रूपं। ननु पिबेः तस्य नत्यपीतिई त्वनिषेधात्। जिघ्रास मो[illegible]न इति घ्राः अस्मदर्शोसन १६
इत्यात्मनेपदं। वामं सव्ये प्रतीपे चेति विश्वः॥ अकूपतिर लंकारः॥ वर्त्तिस्तत्कैव। गो।डी यारीतिः।
शार्दूलविक्रीडितं छंदः॥ १०॥ आनंदसंमोहवती मुदाहरति॥ ॥ नखक्षतमिति॥ काचिन्नायिकाले
वद१ तशिहांकृ[illegible]ति॥ हे आलि सखि वक्षस्थले कररुहक्षतं। अधरदले अधराधः प्रदेशे रदस्य व्रणं क्षतं।

वक्त्रे लक्ष्ममालाच्युता त्रुटिता॥ मुक्ताहार स्रग्गलितः सुरतावसानकाले मया सकलमेत त्पूर्वोक्तं
दृष्टं नतु सुरतसमये एवं संस्मृति स्मृतिः क चरतिः कचतव शिक्षाविधिः क्वेति कौक्व शब्दौ शब्दैर ते शि
क्षा स्त्र सो भ्यमहदंतरं सूचयतः॥ एवं च विगलितवेद्यांतररति संजाता नेत्यायाः संभोगसाम्यविष
एपि स्मृति र्नस्थितात तत्तदुपादि स्मर रति विशेष विषक शिक्षा विधि स्मरणं दूरतो ऽपास्तमित्यर्थः॥
परमित्यपहाय क्षतमित्यनेनमर्म विधित्वं नरवस्य व्यज्यते॥ अधरस्य उपरि भागापेक्षया ऽधरोभाग
स्यातिकाठिन्यवत्त्वया तद्वाचिना तलशब्देनाधिकत्रयत्वे दंतस्यापि दंतव्रणस्य रतिसमये अ
नवगतिः॥ आ[illegible]ली सखी वयस्या चेत्यमरः॥ पृथ्वी छंदः॥ ११॥ एवं निरूपितेषु स्वीयाभेदेषु म
ध्याप्रगल्भयोर वस्थाभेदेन भेदानाह॥ ॥ मध्याप्रगल्भे इति॥ इत्युपलक्षणं॥ परकीयासामा
न्यवनितयोरित्यपि हस्वीयं वहुमानमानत्रासौ त्रिः प्रकारेत्यर्थः॥ तानेव प्रकारानाह॥ धीरेत्या
दि॥ धीरां लक्षयति॥ व्यंग्य इति॥ व्यंगः केन चिन्हेनानुमेय॥ कोपप्रकाशो यस्याः सेत्यर्थः॥
प्रौढा या इति॥ प्रगल्भा या इत्यर्थः॥ विशेषस्य परकीया या धीरादिभेदमसहमानानां के
षांचिन्मतमनूद्य दूषयति॥ धीरादि भेद इति॥ आज्ञामात्रं ज्येष्ठति खिलमित्येव त्रामाण्यं
नतु युक्तिमत्वेनेत्यर्थः॥ नहि प्रतिज्ञामात्रेणेष्टसिद्धिरितियुक्तिं वक्ति। धीरत्वमित्यादिना तदुभयोर्धी
राधीरत्वं मानियतं मानेसमकालीनं उपाधिकमिति यावत्। प्रसक्ते किमायातमित्यत आह॥

र.टी.श.

परकीयायाइति॥ अनुभवसिद्धस्य वस्तुनोऽपलापानर्हत्वादित्यर्थः॥ ननु परकीयायामानसत्त्वएव तत्स्यात्त
एवनास्तीत्यत आह॥ मानश्चेति॥ अत्र कश्चिन्मुग्धाया अपि धीरादि भेदाः संभवंतीत्याह तदसत्। त
त्र हठानाक्रांतत्वात्॥ तथाहि॥ यं गएकोपधूर्मकाधादिकं हि तद्ग्रहणं तच्च मानजनियतं। नचमुग्धा
यामानः लज्जाभयबाधान्येनतस्यास्तत्त्र्यीऽकचातुर्याभावादिति। मध्याधीरामुदाहरति॥ ॥लोला
लिपुंजइति॥ काचिन्नायिका ह्लतनायिकांतरसंचारं प्रेयांसं गलत्सुरतश्रमवारिधारं वदति॥ अत्र
मध्याधीरात्वं सामर्थ्यलभ्यं॥ तथाचाहं तनोहेतो संवतोदेहेनलिनीदलेन धीरं समीरं विधातुं समीहे इति
संबंधः॥ नवलः स्वतंत्रे छस्यदेहेमम्मोभाग्यप्रचयस्यानेशरीरेनलिनीदलेन मदंगसंताप
कारकेण कमलिनीपत्रेण धारं नातिशीतं नात्युष्णं समीरं वायुं विधातुं कर्तुं समीहे इच्छामीत्यर्थः
ति९ स्वदेहोपेक्षायां मम्मोभाग्यहानेरित्यभावः॥ तच्छब्दसंबंधी नले यच्छब्दार्थमाह॥ यतोहेतोः श्रम
वारिधाराः [illegible] स्फाराः बभूवुः॥ श्रमस्तावत् दूरगमनजन्यायासस्तत्संबंधिवारि। तदुत्पा त१०
दकं तस्य धाराः संततयः स्फाराः उत्कराः संपन्नाः॥ श्रमोदये हेतुभूतं विशेषणमाह॥ लोलालि १७
पुंजेनिकुंजेऽवव्रजत इति॥ लोलाः सर्वस्यातिप्रदेशस्यातिरमणीयत्वेन कां [illegible] दिशिकतयेतस्त
२३ तो भ्रमंतः॥ अलिपुंजा भ्रमरसमूहा यस्मिन् निकुंजे निबिडतरलतावलप्रदेशो व्रजतो दूरदे
शत्वेन वेगेन गच्छत इत्यर्थः॥ लोलालिपुंजइत्यनेनएतद्गमनं प्रतीक्षमाणायास्तत्र स्थितायाः
कस्याश्चि [illegible] द्वितननीलिमकराक्षणमाकर्षतीत्यज्यते। निकुंजइत्यनेन च स्त्रीसमूहे निःशं

कस्तं चारित्वं चव्यज्यते॥ सत्त्वमात्रतदुद्देश्यकगमनाभावः॥ स्फाराइत्यनेननैतावताः॥ कदाचिदपिस्वे
दोद्गमो जात इत्यावर्यमित्यादिभावो वा साहचर्यान्नातिदुरूहइति। नायं कुंजगमनेन खेदः किंतु वि
लासिनीसमूहक्रीडायास्तेनेतीदृशखेदस्य नवानेवसहैवकोक्तिः॥ तथाच सापराधत्वप्रकाशनं। लो
लभ्रमरसमूहयोरिन्यमरः॥ वक्रोक्तिरलंकारः॥ जारानुप्रासश्च शब्दालंकारः इंद्रवज्रावृत्तं॥
॥१२॥ ॥अधीरामध्यामुदाहरति॥ ज्ञातस्त्वइति॥ काचित्स्वनायिका ह्लतसंगं नायकमनुपालंभते।
त्वयरात्रौ कांतांतरविविधाक्रीडासक्त्या जागरणं समभवत्। ममनेत्रौ हु जेनेत्ररूपेनीलोत्पलेरक्ति
मा जातइतिशेषः॥ कोपोदयादिति भावः॥ युक्तं उपा [illegible] धिसंनिधाने उपधेयस्फुरणं। जपाकुसुम
संनिधानेस्फटिकरक्तिमाइव। इहतु वैरित्यमितिपुनः शब्दस्त्रिचित्रीकरणार्थः॥ त्वयामधुमधंप्रवि
तलंयावदेव [illegible] छिकं निःपीतं अन्योन्यंगंडूषदानादिना प्राशितं। तन्ममनोज्ञानवत्तया। अविवेकत
पिहृदयं व्याघूर्णितं किंवा जातं कुत्रवागतं। कांतेनेति भ्रांतमित्यर्थः॥ अत्रापि पुनः शब्दाकर्षणेन
पूर्ववच्चित्रीकरणार्थमुल्लेपः॥ तथात्रामतंचपलायेत्वमरा हेते घनेघनिबिडे मदन्यस्त्रीकटा
क्षसनाथइति व्यंग्यं॥ लताप्रिलितो दरमवनेत्वया श्रीफलं बिल्वाकारस्तनाख्यं फलं प्राप्तं। यद्वा
श्रियो यौवनादिलक्षण्याः फलं संभोगादित्वया प्राप्तं। मां एषः एतदवस्थाप्रापको मदनो मर्माणि वे
धितिः पंचभिः शरैरतिशयेन भिनत्तीत्यर्थः॥ येन [illegible] निध्यादिकं लभ्यते युक्तं। तस्माराद्धा शर
भेदनं। इहतु तवलाभो मम कृंतनमिति चित्रीकरणार्थः॥ पुनः शब्दः शरैरितिबहुवचनेननैके

रु॰टी॰१०

अ२

केनन द्वाभ्यामिति स्वचकेन बाणानां दुःसहत्वं। हंततीत्यनेन पूर्ववौत्तराबधिसंसूचता। एतादृशस्यपा
पिनो नाम्या पिनश्चौमिति संबोधनपदानुक्तिर्व्यनक्ति। ज्ञातइति गत्यर्थेनकर्त्तरिक्तः॥ श्रोणिमेतिवर्ण
दृढेतीमनोज्ञा निष्पीतमिति कर्मणिक्तः॥ व्याम्यदितिवाक्याशेतिशयन्यः शब्दामिति दीर्घः॥ श्रीफल
स्यावयवः फलमिलुत्पन्नस्याणः फलेलुगिति लुक्॥ हंततीतिशमुचादीनामितिनुम्॥ विश्लेशं
दित्यश्लेषरूपो मालंकारः॥ श्रीफलाबधीत्यमरः॥ विरोधाभासो ऽलंकारः अत्रनायिकापुरुषभाषणं
स्फुटमेव॥१३॥ धीराम ध्यामुदाहरति॥ ॥कांतानुरागेति॥ काचिन्नायिका कृतापराधं कांतम्
पालभते॥ कांतानां त्वस्मिन्ननुरागे आसक्तिविशेषे च चतुरोसि तथा नटसि यया विस्मृतान्य कोपीस्त्व
य्यासक्ता भवंतीति सौभाग्यवानसीत्यर्थः॥ नहीदमेवासक्तिबीजं किंत्वन्यदपीत्याह॥ मनोहरोसि
सुहृदोसि अर्थांत्वाति ज्ञानवत्या विवेकिनो हृदयस्यापि हर्त्तासि किंपुनस्तासां मुग्धमानां॥ ना
थोसि स्वामित्वेनानुपालनीयोसि॥ ध चिद्योग्योसीतिपाठः॥ तत्रतस्यायेचातुर्यादिगुणास्त
एव तत्त्वत्यपीतितदनुरूपोसीत्यर्थः॥ किंचेति व्याख्यातपूर्वं। नवयौवनेनालंकृतोसि इदमेवा १९
लंकारकं न तु कृतविनयादीत्यर्थः॥ ननून्मत्ताः धूर्त्ताः किमिव हि न कुर्वंति चरितमिति भावः॥
यद्वा कांतेति पृथक्पदं संबोधने ऽनुरागचतुरोसीति। अननुरक्तो मय्यात्मन्यनुरक्तो करोषी
त्यर्थः॥ तस्यामननुरक्तायामपि त्वमेवलादनुरक्तो भवेत्॥ तिर्यक्कृतातिवबद्धमतांप्रकर
यसीतिभावः॥ सुदृशानायिकया इत्थमनुनाप्रकारेण निगूढस्य स्पष्टमुक्त्वा प्रतीकार्यत्वेननिश्चयस्य

वाष्पं विमुंच्य वाष्पमिश्रीकृता दृक्प्रांता निहिताः॥ प्रेरिता इत्यर्थः॥ कोपोद्यादिति भावः॥ २१
वाष्पकुलिता इत्यनेन तिर्दुःखोक्तिः दृगंता निहिताः॥ न अनुगीतिस्वरविशेषस्य चिंतयाका
कानिरादरोक्तिः वक्रोक्तिरलंकारः॥ अथ एवोदाहृत्यंगकोपप्रकाशे उत्तरार्द्धं ऽव्यंगकोप
प्रकाशे धीराधीरत्वं स्फुटमेव॥१४॥ एवं मध्यामुदाहृत्य प्रगल्भामुदाहरति॥ प्रौढायपा॥
नेतत्यमिति॥ नायको वदति॥ शयनीयं न सेवसे अनंतइव सदृशो वदति। अवलो वाचोनर ५
कनं नाकरोषि। तत्र हेतुः परिजनं क्रोधप्रकाशछलात्परिजनेपरिचारिकाजने क्रो
धः॥ कोपस्तस्य प्रकाशनं प्रकटनं तच्छलात्तन्निषादित्यर्थः॥ एतादृशं दुश्चेष्टितमति
मलिनानामप्रेमास्पदीभूतानामेकाकीनीनां भवति न भवादृशीनामित्याह॥ इ
छामित्यादिना। इंकेतकाव्यवचकुसुमनधमवलीधिके। अतिप्रेमास्पदीभूतेइछंनि
रपराधपरिचारिकाजना विः कृतकोपाभिषेण यमपराधीति न्नं लिजनितकोपा
छादनं तत्तर्हि न वेदेव चेत्पुनः शब्दः चोनः पुण्ये पुनःपुनः सहचरी सखी सावित्तिर्य
कृतलमुखं यथा तथा हास्यं न विदधीत। सखीहसितमेवैतादृक्चेष्टाव्यंजकमेवेदिति
भावः॥ सहचरीत्यनेन सहचरति न कापि कार्ये हीयत इति व्युत्पत्त्यानेन सकलनायि
काभिप्रायज्ञानपात्रतोव्यंजिता। पचादौ चरडितिपाठ। सुपेति समासे सहचारी

साधुः। विभावनालंकारः॥ शार्दूलविक्रीडितं वृत्तं॥ ४५॥ अधीरां मध्यामुदाहरति॥ प्रतिफ
लमिति॥ इंदोश्चंद्रस्य कला यो षोडशो भागः स्वीयं प्रतिबिंबं दृष्ट्वा। महादेवमस्तके पर
स्या गंगायेत्स्वयाश्चन्यस्याः। स्थितिमाशंकमाना रोषदोषवशेन नेयं चंद्रकला कि
लक्ष्य४ त्वं नेनातिप्रेमास्य दीनता काचिच्छापिता स्ति किं चिद्वदास्यस्या अतिक्रम्य चकग
हृदनीय महादेवमस्तकमधिरूढा एकस्यां विद्यमानायामपि किं वदास्यस्य सा
दृसं यदेका काक्षादि नाषिते॥ शिरसि स्थाप्य उपेक्षिता च मया इदानीमपि मदुःखं सर्व
त्रैव बाध्यते। इत्यादि॥ दशापुनरप्यन्यां स्थापयति। इदानीमपि नोपेक्षितुमुचितमिति
नीरे चितर्कयंपर्वतपुत्री प्रचुरतरकोपेन पोदितकंपेन तदेव सर्वेषां गात्राणां शोषात्
चंचलं यत्कंकणं तस्य वलीनां सर्वतः प्रसरणशीला या द्युतिस्तद्युक्तेन भुजेन शि २९
वं निनर्त्तयदित्यर्थः॥ अचलकन्यकेत्यनेन विवेकपात्रता स्तू चिता॥ तर्जयामा
सेति च हि तर्ज भर्त्सने इत्यनुदात्तत्वनिबंधनस्यात्मनेपदस्यानित्यत्वात्परस्मै
पदप्रयोगः॥ बोपदेवस्तु अमुंडि पठितत्वात् तन्मते परस्मैपदप्रयोगः स्थि
त्यः॥ ससंशयालंकारः॥ मालिनी वृत्तं॥ ४६॥ प्रौढाधीराधीरामुदाहरति॥ तल्पो
पांतमिति॥ प्रियतमे वदनेन तल्पोपांतं शयनीयप्रांतमुपेयुषि आगतव

ति सति सापराधस्यास्य सन्मुखस्थितिरपि नोचितेति कोपेन वक्रीकृता तिर्यक्कृत
ता श्रीवा मन्यायया तथा। यद्यपमेवं नरितवती तर्हि प्रायो मदपराधज्ञानात्कुपिते ङ्गा२
ति धिया काकुव्याकुलया चि। कंठध्वनिविशेषेण व्याकुला आकुलवती स्वचलेददृर
पदावाली यस्य तस्मिन्सति। सा चिरहसितस्फुरत्कपोलश्रिया कथमयं काकु
लापमेन मां प्रसादयितुमुद्युक्त इत्याश्चर्येण कोपे हसितदर्शना च सा चिरं ईषत्ति
र्यक्कृत्वा यावद्धसितं तेन स्फुरंती शोभमाना कपोलश्रीर्यस्यास्तया यया दी
यं हसितवती तर्हि प्रसादं प्राप्तेति बुध्वा हस्तस्थापितहस्ते पुनर्मग्नरशनानायि
कया सापराधेनाप्यनेनातिधृष्टेन करावलंबनं क्रियते इति रोषातिशयेनला
क्षारसेनालक्तकरसेन क्षालितमनुलिप्तं यत्प्रोष्ठीदृष्टं शफरीदृष्टं तत्समयस्याः।
किरणास्तद्वन्मांसलारुचो दीप्तयो यासां ताः दृष्टयः तत्त्या करारूः विस्फारि
ताः। विशेषेण प्रहिता इत्यर्थः। प्रोष्ठीपदेत्यादि दृष्टिविशेषणेन सापराधोप्ययं
मां स्पशन्नावतीभिः। कौतुकीनामिर्द्धनैर्निवार्यते इति सखिरपि पत्नी
ति शेषातिशयोक्तिः॥ प्रोष्ठीतु शफरी द्वयोरित्यमरः। काव्य

लिंगमलंकारः॥ स चोपमानुप्रासाभ्यां संसृज्यते। मांसलेतिसिद्धादिभ्यश्चेतीलच्प्रत्य
यः॥१३॥ एवं मध्याप्रगल्भयोर्धीरादिषड्भेदानुक्त्वा धीरादिभेदविशिष्टयोरेव
तयोर्द्वैविध्यमाह॥ एते चेत्वार्य ज्येष्ठाकनिष्ठत्वं तेन॥ एते धीरादिषड्भेदवि
शिष्टमध्याप्रगल्भे द्वाभ्यां प्रकाराभ्यां भिद्यत इत्यर्थः॥ इदमुपलक्षणं मुग्धा
या अपि ज्येष्ठाकनिष्ठास्वरूपभेदसंभवात्। तथाहि॥ ज्येष्ठत्वकनिष्ठत्वयोर्भ
र्तृस्नेहाधिक्यन्यूनत्वे एव प्रयोजके न च गुणाधिक्यन्यूनत्वकृतेन मुग्धा
यां दुर्वारिते इति॥ सा द्विधा कथं न स्यात्। एकत्र रतिकलाकलापकौशल
तरतमभावादिगुणदोषोभयत्र स्नेहाधिक्यन्यूनत्वकारणे अपरत्रासौ द्वयं तर २०
तमभावादिरित्यन्यदेतत्। दृश्यते च तस्यां तरतमभावादिनिमित्तं। सौंदर्यं कन
कनकद्युतिः॥ शशिसमाः पुष्पैः समं मार्दवं वंकं हे कोकिलमाधुरी सुवयसो
हृद्रूपलीलक्षणं। शय्यायां सुरतागमेन हि नहि स्युच्चारणं लज्जया यस्यां का
रणमेतदस्ति सकलं चातुर्यकोष्ठापि किम्॥१॥ किंच यत्रैकनायकस्य द्वे मुग्धे ता

पि तत्र द्वयोः समानविषयत्वासंभवेन तरतमभावरूपवक्तव्यत्वात्। अत एव शृंगारति
लके। मध्यापुनः प्रगल्भा च द्वेधासौ परिभिद्यते। एका ज्येष्ठाकनिष्ठान्या नायकप्र
णयं प्रतीति॥ नायकप्रणयस्य कं दृत एव ज्येष्ठादिभेदप्रयोजकत्वकथनादित्यव
मतिपद्यते वितेन। न त्वेवं प्राचीनग्रंथे विरोधः॥ न्यायप्राप्ते ऽर्थे किं क्रमः॥ ज्येष्ठाकनि
ष्ठे क्रमेण लक्ष्यति॥ परिणत्वेसत्नाति॥ तथा च भर्तुः स्नेहस्तं ज्येष्ठात्वं कनिष्ठा
त्वं न तु वयः कृतमिति भावः। सत्यवावर्त्तमाह। अधिकस्नेहास्त्विति॥ तातासामप
रिणीतत्वादिति भावः॥ धीरां ज्येष्ठां कनिष्ठामुदाहरति॥ एकस्मिन्निति॥ बहिः प्रदे
शाद्गृहमागतः। कश्चिद्दक्षिणो नायकः एकस्मिन् शयनेतल्पे सरोरुहदृशोर्ना
यिकयोर्निर्व्यांमनसः पुरी नति संयोगज्ञात्वा तयोर्मध्ये पद्व्यत्रविततो विस्तारितोऽ
वगुंठनपटः शिरोवासो विशेषो यस्यास्तामेकां मुक्तकंधरद्रग्रीवः सन् दृष्टवाना
लोकितवान् किमियं जागर्ति सुप्ता वेति ज्ञातुमित्यर्थः। सएवान्यस्या अपरस्याः
सविधं निकटं समेत्यागत्य निभृतम्स्वंतं व्यालोलायाः हस्तांगुलयस्तद्व्यापारैस्तज्जृरिते

वसनांचलं वस्त्रप्रांतं चपलयन् धूनयन् स्वापश्रुतिं निद्राव्याजं कृतवान् बकारेत्यर्थः॥
अनया सह क्रीडितव्यमिति धियेति भावः। अत्र पूर्वार्द्धे उपहितत्वेन स्वल्पस्नेहतया कनि
ष्ठानायिका। उत्तरार्द्धे तु क्रीडासु कलादधिकस्नेहतया ज्येष्ठेति विवेचनीयं॥ १९॥ ॥अ
धीरां ज्येष्ठां कनिष्ठामुदाहरति॥ ॥अंतःकोपेति॥ कोपि दक्षिणो नायकः अंतःकोपेन
अंतरकोपेन कषायिते कलुषीकृते प्रियतमे एकां पुष्पव्याजेनावलोकयन् तयोर्मानः समाधा
नाय घनेलतागृहप्रदेशतया निबिडे कानने वने एकां कां पुष्पस्य जातावेकवचनं
पुष्पाणामवचयाय एकीकरणाय एकीकृतपुंजग्रहणाय वा नम्रवदनामधःस्थितमु
खीं समायोजयत्। तमेनं पुष्पावचयं चिनुहीति गौरवपुरस्सरं तत्रासक्तचित्तां
कृतवानित्यर्थः। अन्यां नववधूं नवयौवनां कांतां पुनस्तादृशीं नर्मचेष्टादर्शनोदि २१
तसुखवशाद्दृढोन्मीलिते लोचनेनेत्रे तयोर्ये अचलचमत्काराः। प्रांतच्छटा विभ्रमाः सै
रनिरामं स्पृहणीयं आननं यस्यास्तां। स्मेरः स्मितविकस्वरोऽधरपल्लवो यस्याः
स्मेरमंदं यस्मिन् स्तादृशो द्वाधरपल्लवो यस्यास्तामिति वा॥ समालिंगति। सर्वांगमा
लिंगतीत्यर्थः॥ अंतःकोपकषायितेइत्यनेन नायकापराधदर्शनोदितकोपस्यांतर

वस्थापनेन नायिकयोरुत्तमत्वं। प्रियतमइत्यनेनातिप्रेमास्पदतयाऽनुनययोग्यत्वं। काननवि
शेषणेन घनइत्यनेन दृक्पातातीतत्वं। पुष्पस्येत्येकवचनेन एकैकपुष्पावचित्या विलंबं। नम्र
वदनामिति नायिकाविशेषणेन विनीतत्वं। अर्द्धोन्मीलितमित्यादिना विशेषणद्वयेन नायिकाया निः
सीमसुखत्वं। नववधूमित्यनेन। लिंगनयोग्यत्वं। समालिंगतीति वर्त्तमानप्रयोगेण पूर्वोत्तराव
स्थिरूपतां व्यनक्ति॥ कषायितइति तत्करोतीति णिजंतात्कर्मणि क्तप्रत्यये णिलोपे
सिद्धं॥ अवचयायेति पचाद्यच्। अत्र कश्चित् हस्तादाने चेरस्तेयइति घञ्प्रसंगे चिनो
तेरच्प्रत्ययः कथमित्यत आह॥ तन्मंदं। अधःपतितानां हस्तादानविषयत्वाभावात्। तथा
हि। ऊर्द्धस्थितपुष्पाद्यादेर्हस्तेन ग्रहणं हस्तादानं॥ प्रकृते तु विप्रकीर्णानां पुष्पाणामेकी
करणाय एकीकृतपुष्पग्रहणार्थं नियुक्तत्वेन तदभावात्। न च तत्रापि हस्तादानत्वेतिवा
च्यं। एवं तर्हि सर्वत्र हस्तादानार्थस्य यथाकथंचित्तत्त्वात् हस्तादाने त्यस्य वैयर्थ्यापत्तेः। तस्मा
दुदुक्त एवार्थो हस्तादानस्येति दिक्॥ अर्द्धस्याधरं अर्द्धाधरइति विग्रहः अर्द्धं नपुंसकमिति
समासः॥ अर्द्धोन्मीलितेति अर्द्धमुकुलितेयं दृष्टिः। तदुक्तं दशरूपके॥ स्तोकोन्मीलितता
राया मनाक्कुंचपुटो भया॥ किंचिदुत्कंपपक्ष्माग्राद्कु

साढ्ढं मुकुलामुखा। इति॥ अत्रापि पूर्वोक्तरीत्या पूर्वार्द्धैकनिष्ठा। उत्तरार्द्धं ज्येष्ठेति विवेचनीयं॥
॥२१॥ ॥धीराधीरां ज्येष्ठाकनिष्ठामुदाहरति॥ ॥धैर्याधैर्येति॥ कोपि नायकः। धैर्याधैर्य
योर्धीरत्वाधीरत्वयोः परिग्रहः। स्वीकारस्तस्य ग्रहः आग्रहो विद्यते ययोस्तयोस्तदाग्रहव
त्योरिति यावत्। एतादृशोः स्वंचलनयनयोर्नायिकयोः प्रीतये संतोषाय अनंगकांत्या
नीलपीतादिभेदेन नानाविधकांत्या भूयस्या वा कांत्या अनया रुचिरं सुंदरं रत्नद्वंद्वं मणि
युगलं मुष्टिद्वये बद्धकरयुगले न्यस्तवान् न्यासीकृतवानित्यर्थः॥ परंतु एकस्याः कनि
ष्ठायाः करे हस्ते रत्नं माणिक्यं कलयन् ग्राहयन् स्तनं परस्याः ज्येष्ठायाः प्रियः प्रेमास्प
दीभूतो हस्ताहस्तिमिषात् हस्ते न हस्तेन गृहीत्वा इदं युद्धं प्रवृत्तमिति हस्ताहस्ति पर
स्परहस्तग्रहणं तन्मिषात् व्याजात् कुचतटिनीं स्तनतटीं स्पृशन् स्पर्शं कुर्वन् आ २२
नंदं संतोषविशेषमाविंदति अनुभवतीत्यर्थः॥ ग्रहिलयोरिति पिच्छादित्वादिलच्। यद्वा
गृहीतस्ते ग्रहिल इति ग्रहेरौणादिक इलच्। हस्ताहस्तीति हस्तेन गृहीत्वा इदं युद्धं प्रवृ
त्तमिति विग्रहे तत्र तेनेदमिति समासे अन्येषामपि दृश्यत इति पूर्वपदस्य दीर्घत्वे इच्
कर्मव्यतिहारे इति समासांते इचि तिष्ठद्गुप्रभृतीनि चेत्यव्ययत्वे
सिद्धं।

न तु न तत्र तेनेदमित्यनेनेदं युद्धं प्रवृत्तमित्यर्थे समासविधानात् प्रसक्ते च तदभावात् कथं समासः। इति चेत्। नात्रा
पि परस्परहस्तग्रहणरूपयुद्धसत्वात्। मुष्टिर्बद्धकरे फलइति विश्वः॥ अस्मिन्श्लोके ज्येष्ठाकनिष्ठे स्फुटे एव॥
अत्रोदाहरणत्रये पिहितमलंकारः॥२२॥ ॥सपरिकरां स्वीयां निरूप्य क्रमप्राप्तां परकीयां निरूपयति॥
अप्रकटेति॥ अप्रकटः परस्मिन्नुपपतावनुरागः प्रीतिविशेषो यस्याः सा परकीयेत्यर्थः। अप्रकटपरपुरुषानु
रागेत्युक्ते मध्यायामतिव्याप्तिरत उक्तं परेति। सामान्यवनितायामतिव्याप्तिनिरासायनभ्रउपादानं। सा
च द्वाभ्यां भिद्यत इत्याह सा चेति। तद्भेदद्वयमाह॥ परोढेत्यादि॥ परिणेत्रान्येन ऊढा परिणीतेत्यर्थः॥ न
नुऊढायाः श्वश्र्वाद्यधीनतया भवतु परकीयता। कन्यकायास्तु कथमित्यत आह। कन्यकाया इति। अ
न्याधीनत्वमात्रं परकीयाप्रयोजकमिति भावः॥ तस्या व्यापारमाह॥ अस्येति। गुप्ता भर्त्रादिनाऽज्ञाते
त्यर्थः॥ तत्र परोढां परकीयामुदाहरति। परोढा यथेति॥ अयमिति॥ मनःसंकल्पितपरपुरुषाकापिवदृश
मारोद्दीपनविभावसंदर्शनोदितकंदर्पा सखीं संबोधयति॥ अयं पुरोवर्त्तिनि रेवाकुंजे श्वंइदकन्यासंबंधि
लताघावतप्रदेशः कंदर्पसेवनयोग्यो वर्त्तत इति सामर्थ्यलभ्यं कंदर्पाराधनयोग्येऽस्मिन् तदाराधनं विना
केवलमवस्थानमनुचितमिति भावः॥ किंचायमनुष्णाशीतस्पर्शः समीरो वायुः। वेलायां निकुंजमर्दोर्पी
पांतस्थो तइति यावत्। दरइषद्दलिताः किंचिद्विकसिताः याः एलालताः फलानि पुष्पाणि वा तासां परिमलो गंधो
यस्मिन्नेवंभूतो वाति सामर्थ्यं। नवेति पाठे नवोऽभिनव इत्यर्थः॥ अभिनवपयोध्वरचनाकुराज्ञाइममनुभ्रे

यमानाधम्या॥ सजलजलधरसंपादनेनमद्गिकैतैश्चिणीकृततत्या आवहृद्वर्तते। एवंच हेसखि आलिपरस्मिन्नन्यस्मिन्नधीनं नियंत्रितं चेतोमानसं किमपिकर्तुं तत्संगमेनात्मानं कृतार्थयितुं मृगयते विचारयतीत्यर्थः। कुंजस्य रेवासंबंधेनतस्याश्चंडकल्पकत्वात्कंदर्पसंतापशांतियोग्यत्वं। कुंजइत्यनेनजलाधावततया सुरतानुकूलत्वं। समुचितइत्यनेनसख्यनुमित्यपेक्षां सूचयति। समीरइत्यादिनाउद्दीपकत्वं। एलाइति पुष्पफलमूलेषुबकुलमितिप्रत्ययलुपि पुंस्त्ववत्स्त्रीलिंगवचने। शिखरिणीवृत्तं॥२१॥ ननुगुप्तादीनामन्येषां भेदानांसद्भावात्कथं द्वैविध्यमित्याशंकायामाह। गुप्तेति। सततकार्यगोपनापुंश्चलीभावेपंडिता। स्वपुरुषेणतदीयेनवाकेनचिद्दृष्टा॥ जारसमूहारन्तशीला। इष्टहानेरनुतापवती। गुप्तांविभजते। गुप्तेति। भेदानेवाह॥ वृत्तेति॥ उक्तभेदानेकपद्येनोद्धरति॥ श्वश्रूरिति। कापिपरपुरुषोपभोगजन्मनखक्षतादिचिह्नमाच्छादयितुंसखीं प्रत्याह॥ श्वश्रूर्भर्तृजननीत्वेनानुलंघनीया ऽज्ञाप्याज्ञोल्लंघनेनकोपंकरोतु। सुहृदः संबंधिनः प्रीतिमाकुर्वंतु। वाकारोऽप्यर्थस्तातरोरेवरपत्न्योऽपिनिंदंतु। श्वश्र्वादिवचनीगर्हणीयेत्येवमाकारो निंदांकुर्वंतु। तस्मिन्मंदिरेश्वश्र्वादिऐगृहे पुनरपिमयास्वापोनकर्तव्यइत्यर्थः। स्वापाकरणेहेतुमाह। आखोर्मूषकस्याक्रमणाय जिघत्सयाकोणकुहरात्कोणगतबिलाद्दुत्फालमुद्रूयेनं आततवती विदधाना बिडालीखरैस्तीक्ष्णैर्नखैर्मे मम कांकांदुर्दशां विडंबनांनकृतवती अपितुसर्वामेवेत्यर्थः॥ साधुर्दृगत्वयाविदितैवास्तीतिभावः। अत्र २३

व्याजेनपरकृतनखक्षतादिगोपनंस्फुटएव॥ भार्यास्तुभ्रातृवर्गस्ययातरः स्युःपरस्परमित्यमरः॥ नखोस्त्रीनखरोऽस्त्रियामितिच। व्याजोक्तिरलंकारः॥२२॥ विदग्धां विभजते॥ विदग्धेति। विभागमाह। विदग्धेत्यादि। तत्रवाग्विदग्धामुदाहरति॥ निबिडेति॥ काचित्संकेतमुपदिशंती पांथमाह॥ हेपांथिक पांथपतौ अतिशयिततापिनि सवितरिसर्वे मध्याह्ने सति। अत्यर्थंतत्रोद्दीपनविभावहेतुपुष्पादिमतिसरित्तटेनदीतीरेनिवासोवसतिःसमुचितोयोग्यइत्यर्थः॥ निबिडअतिशयेनघनास्तमालाकालाः मल्लिबद्धयो मल्लिकालताः विचकिलाः हृद्युरामल्लिप्रभेदास्तासांराजयस्ताभिर्विराजितः शोभितः उपकंठः अंतिकप्रदेशो यस्मिन्निति समासार्थः॥ अनेनतरस्यतमालाद्यावृततया सुरतयोग्यता सूचिता। अथचविराजितउपकंठइतिच्छेदे विराजित शोभित। अपतौ प्रसवितरि तत्रसरित्तटे उपकंठे अर्थान्ममकंठसमीपेवा॥ स्थलेवसतियोग्येत्यर्थः तरमपि॥ सुकुमारस्य ग्रीष्मतप्तस्य ते स्तनाभ्यामतिशीतलाभ्यां मद्धृदो भूरेव संतापहरणेयोग्ये तिभावः॥ स्मरो विचकिलो मल्लीप्रभेदे मदनेऽपि चेति विश्वः॥ उपकंठांतिकाभ्यर्णमित्यमरः॥ अत्रचवाग्विदग्धा स्फुटैव॥२३॥ क्रियाविदग्धामुदाहरति॥ दासायेति॥ कस्याश्चित्स्नुषायाः परकृतनखक्षतादिमत्याः किमिदमितिभर्त्रा पृष्टाया गृहांगणगतावननकंरकिवरुद्धयोगमनागमनवशेनप्रत्यहमिदमाविर्भवतीति एवंवचः श्रवणसंतापवशेन गृहपतौ कर्मकरायत दूरुच्छेदनमादिष्टवति सतिचप

टि॰ ३०

ऽनयना यहे मं हेमंत तौ द्वैधी भावकरणी भूतं शास्त्रविशेषमग। धोदकेत्यजति स्ने स्मेत्यर्थः॥ दासोऽहि इत
स्तत अन्विष्यन् जलं न संभावयेत् संभावयन्नपि तस्याति शीतलतया न तत्र विशेए तेनकालांतरे
च कार्यांतरे विस्मृतिरेव भविष्यतीति धिया युक्तमेवात्र गोपनमिति क्रियावैदग्ध्यं स्फुटमेव॥ क
र्कंधुर्बदरी फलमित्यमरः॥ द्वयोः कुठारः स्वधितिरितिच॥ २४॥ लक्षितामुदाहरति॥ यद्धूमिनि॥ काच
न सखीवक्ति। यदनुष्ठितं तदनुष्ठितमेव॥ ज्ञातस्य वचनशतेनाप्य निवर्त्तनादिति भावः॥ विरुद्धाच
रणं जन्यार्थं तस्यावश्यकतया यददिष्टं भवेत्। वा शब्दः साधर्थे। तदपि साध्वित्यर्थः॥ एतादृशं क
र्मनकर्त्तव्यमेवात्रतं त्वपरिपूर्णसुखमेव्यमित्याह॥ यदाचर्च्यते। तदाचरितव्यमेव॥ अरिप्रस्या
वश्यभाषितत्वाद्‌नाचरणं दाचारः॥ गोपनविषयकः प्रयत्नो विफलो व्यर्थ इत्यर्थः॥ अत्र नर्मस्फो
टोऽलंकारः॥ २५॥ कुलटामुदाहरति॥ एतइति॥ काचित्स्वैरिणी वक्ति॥ एते दर्पमानाः परोपकारा
भिमानिनो मेघा अस्मदपयोगिनो जलबिंदून् क्षिपंति॥ अस्मदुपयुक्तान् जारान् नव २४
र्षंति। किंच एते शैलाः शिलोच्चयाः अकोमलत्वादकारिलिका स्त्रणं प्रकरयंति। जारान्।न। तथा
शैलोकेत्रिष्वपि लोकेषु कल्पवृक्षादितरवः फलान्युपादयंति जारान्नारभंते। कल्पवृक्षा। अपि
अस्मद्भाग्यविपर्यासेन प्रतिकूला एव जाता इत्यर्थः॥ अतोऽहं भ्रलन्वि ध्वस्त जा त्वया कुलटा हेतोः

जरार्थे त्वया किं लब्धमिति कातरमालपामि दीनोपालंभं वदामीत्यर्थः॥ मनुष्या एवास्याः लताः अतित
रां पुरुषाः अतितमां जाराः इति भए अस्मल्लते किं लब्धमित्युपालंभ इति भावः॥ त्रैलोक्य इति चातुर्वण्या
२।३ दित्वात्स्वार्थे ष्यञ्॥ २४॥ अनुशयानामुदाहरति॥ त्रिधेति पुंस्तस्या अपि चेष्टां विशेषणं भेदानाह॥ व
र्त्तमानेति॥ स्पष्टं प्रत्येकमित्यादिति सर्वणामपीत्यर्थः॥ तत्र वर्त्तमानस्थानविघट्टनेनानुशयानामु
दाहरति॥ समुपागतवतीति॥ चैत्रप्राप्तिगलितसंकेती भूतलवंगलतापत्र जातसंदर्शनो दि
तखेदन सुंदरनेत्रा याना पिका पांगं दृस्थलीतालीपत्रपांडिमानं प्राप्तेत्यर्थः॥ त्रिविवेति संकेतवि
घट्टनोदित विषादद्योतनाय॥ २५॥ भावि स्थाना भावशंकया ऽनुशयानामुदाहरति॥ निद्रालुकेकीति॥
काचित्संकेताभावविषण्णां कांचिदाश्वासयति॥ निद्रालुनि निद्राशीलानि प्रशस्ता केका येषां तेषां
बर्हिणां मिथुनानि स्त्रीपुंसरूपद्वंद्वानि येषु तानि॥ कपोतः कर्जरवस्त्रस्य पोतो ऽर्भकस्तेन
व्याप्ताः कपिलाः न्यूलनामहीरूपवत्रवायेषु तानि॥ तत्रापि मत्कल्पिते पितन्विदृशं गिव नाति
किंयंति न संति। बहूनि वर्त्तंते। खेदं मा याहि। प्राणेश्वरस्य गृहं प्रयाहि गच्छ। गमनेन सर्वं भविष्यती
ति भावः॥ निद्रालुत्वाद्धेन जन संचार राहित्यं। केकी मिथुनानीत्यनेन पुष्पाद्युद्दीपन विभावसंदर्श
नेन परस्परवियोगाभावः। कपोत पोतेत्यादिना उद्दीपकत्वं। वनानां संकेतवचनदानयोग्यत्वं च

द्वि·त्रि·

व्यज्यते॥ केकीति प्रशंसायां मिनिः॥ व्याजोक्तिरलंकारः॥२६॥ भर्तुर्गमनानुमानेनानुत्राप्यानामुदा
हरति॥ कर्णेति॥ कर्णे कल्पिता राधाप्रत्यभिज्ञानार्थं यस्या पिता या रसालमंजरी संकेते नीरत्ना आम्र
मंजरी तया पिंजरीकृतं कपोलमंडलं गंडस्थलं यस्य तेतिसमा सार्थः॥ मधुरिपुः स्तनः संकेते गमने
न ममापुनर्मंदभाग्ययातथैव स्थितमितिविषादेन निष्पतंती नयनवारिधारा यस्याः स्तया राधया॥
२५ गिरीहृंपते॥ विलोक्यतेइत्यर्थः॥२७॥ प्रसंगान्मुदितामुदाहरति॥ मुदिता हृष्टेत्यर्थः॥ गोष्ठेष्विति॥ कस्या
श्चित्सखी तदुद्देवस्तुमिष्टं तं पाथ्यंप्रत्याह॥ गोष्ठेषु गवां निवासस्थानेषु पतिर्भर्त्ता निष्ठति॥ नि
रंतरं तत्र वसतीत्यर्थः॥ किंच ननांदा भर्तृभगिनी बधिरा बाधिर्यगुणवती॥ पातु देवैरपत्याश्च
पिनेत्रद्वयस्य पाटवं पटुता नास्ति॥ अंधेत्यर्थः॥ इथं लरुणी नितांम्यष्कृत्वा ऊचकलशप्रांते उरं चितं
रमणीयं रोमांचरूपं कंचुकं आततान विस्तारयामासेत्यर्थः॥ गाव स्तिष्ठंत्यत्रेति विग्रहे घञर्थे
र्थे कविधाने॥ अंबार्थे तिषत्वं॥ गोष्ठं गोस्थानकं चेत्यमरः॥२८॥ एवं परोढां दर्शयित्वा कन्यका २५
मुदाहरति॥ कन्यकेति॥ किंचिदिति॥ किंचित्कुंचिता ईषद्वक्रिता हारलता यत्र यथा भवति तथा॥
सरलेऽकुटिले भ्रूवल्ली भ्रूलते यत्र यस्याः भवति तथा॥ साचि अलस्यं स्मितं हास्यं यथा भ
वति तथा प्रांतभ्रांता प्रांतविश्रांता ताननुकर्णं गता विलोचनयोर्द्युतिः कांतिः करान्हस्त

त्रयथा तथा॥ भुजया हस्ते नपर्यस्तं स्रस्तं कर्णावतंसीभूतं कमलं यथा भवति तथा॥ स्फुरं
ती सर्वत्र प्रसरणशीला अंगुलीयकस्य रत्नखचितमुद्रिकायाः रुक्कांतिर्यस्या स्तया अंगुल्या
गंडस्य कंडूयतं कंडूयनयनं ऊर्वाण विदधाना॥ कस्यचिन्नृपस्य सकलभूमंडलजां जाधीशस्य
कन्यका कन्या सु लतितं वर्त्तमान जन्मोत्तरावधिका जन्मांतरपरंपरतो पार्जितपुण्यसंचयावा
प्तं सर्वांगीणलावण्यं स्य व्याजं जल्पया साभिलाषं कमपमेतत्समागमो भविष्यति केनोपायेन
भविष्यति कदा वा भविष्यति अहं चैतद्रूपामिणं चात्रानयामि उभान्यां वा कुत्रचि कुंजा
दौ गंतव्यमित्यादि लतबहुविधाभिलाषपूर्वकं यथा भवति तथा आलोकने॥ करस्चरण
घं वयवेषु सर्वेषु करादनि दोषेण निर्मिमे यं सादरतया पश्यती त्यर्थः॥ किंचिदित्यारभ्यास
लपर्यंतानि सर्वाणि क्रियाविशेषणानि॥ किंचिदित्यादिना तथा नर्तितं यथा सदति निकटप
रस्था अपि ससरवस्त्रो तथा विधां चेष्टां नाज्ञासुः परं सए व वेदेति नायिकाया अवलोक
न चातुरी व्यज्यते॥ साचिस्मितमित्यनेन उत्तमत्वमपि नायिकायाः सूचितं॥ अंगुल्या
गंडस्य कंडूयनेनान्येनेति स्वरचित्रोष सूचितया कांक्षानायिकागताभिप्रायः सूचितः॥

वस्तुकस्यापीति सामान्यनिर्दिष्टे क्रियमाणेऽल्पकन्यकेति वचनं तेषां स्त्रीणामुपनयनस्थानीयत्वाद्विवाहस्य
गर्भाष्टम इत्यादिवचनप्रामाण्यात् ब्राह्मणकन्याविवाहस्याष्टवर्षावधिकत्वात्तत्र च तादृशादर्शनचा
तुर्याभावाद्विवाहोत्तरं च न कन्यकात्वत्वात्। राज्ञश्चैकादशे द्वे उपनयनकर्मण्यनुज्ञानान्तरं तद्वर्त्तिनिकाले
तादृशावलोकनचातुरी संभवतीति व्यज्यते। कन्यैव कन्यकेति स्वार्थे कः। ननु ह स्वाधर्य्ये अनौचित्यात्तात
याद्दृक् स्वतावकाल हता परिमाण हता वा वचनापः कालहतायाः पूर्वमेव निषिद्धत्वात्। न द्वितीयः अ
तिखर्वस्य बीभत्सतमा तत्र शृंगारानुदयात्। अज्ञानार्थस्वल्पावैशिष्ट्ये नैव निरासः। कुत्सितार्थस्य
अनौचित्यादेव॥३१॥ ॥एवं सपरिकरां परकीयां निरूप्य क्रमप्राप्तां सामान्यां निरूपयति। वित्तमात्रेति॥
पुरुषानुरक्ते त्वुक्ते स्वीयायामतिव्याप्तिः। तस्याः अपि पुरुषानुरक्तत्वात्। अत उक्तं सकलेति। तावत्यु
क्ते परकीयायामतिप्रसंगः। अत उक्तं वित्तेति। तत्रैवातिप्रसंगवारणाय मात्रेति। एतावत्युक्ते अग्निमि
त्रे स्नेहानुरक्तायामैकदावत्यामव्याप्तिमाशंकते। नन्विति॥ कुत इत्यत आह॥ तत्रेति॥ अनुरागस्य निरुपा
धिकत्वादिति भावः। निराकरोति मैवमिति। हेतुं दर्शयति। स्वापीति। महर्षित्यागेन महाराजानुरागे वित्ता
पारेवक्तुमुचितत्वादिति भावः। निगमयति॥ तेनेति॥ सामान्यवनितामुदाहरति॥ यथेति॥ दृष्टेति। अं
गणसन्निधौ प्रस्तुतं गणनिकरवर्त्तिप्रदेशे बहुधनं नैना विधधनवंतं दातारमौर्यादिगुणशालिनं २६

अभ्यागतं सन्मुखायातं दृष्ट्वा दृग्गोचरीकृत्य कुरंगीदृशा अंचललोचनाया नायिकाया वक्षोजौ स्तनौ परस्प
रमन्योन्यमाश्लेषमिवालिंगनमिव तनुतः विस्तारयतः। कुंतलो धम्मिल्लोऽग्रमोटनादिना स्वनाला
काज्ञादानंदस्येरका मुहुर्वारंवारमानंदाश्रुजला निपातयति। आनंदाश्रूणि नैत्यादेव मुंमुक्तिः। किं
चेतिया रव्यातपुनर्वं। दृष्टिः धनागमं कथयितुं इव लणप्रासिंवर्णे पितुमिवेति लुप्तोत्प्रेक्षा। कर्णांतिकं
गच्छतीति तत्र विश्राम्यतीत्यर्थः॥ एतद्दर्शनोदितहर्षवशेन सर्वं चिन्त्यं वस्तु स्यादिति भावः। काव्यलिंगम
लंकारः॥३२॥ ॥एवं तिस्रोऽपि नायिका निरूप्य तद्भेदान्निरूपयति॥ एता इति॥ स्वीया परकीया सा
मान्या इत्यर्थः॥ अन्यस्याः परस्याः संभोगस्तेन दुःखितेत्यर्थः। तत्रान्यसंभोगदुःखितामुदाहरति॥
अन्यसंभोगदुःखितां यथेति। त्वं दूतीति॥ काचित् प्रियमाकारयितुं स्वयमेव प्रेषितां प्रियोपभुक्तां दू
तीं मध्यंतरेणाह॥ हे दूति दूत्यव्यापारपारंगते त्वं कुंजजलावगाहिनी दूरं निरगाः गतवती॥ परंतुपा
पीयसः प्राणपिलक्षीलतनिहत्वव्यापरिग्रहस्य गृहमादिष्ट मिति शेषः। निवासस्थानं ननु। तुन्ना
दूरे निर्हारणे। नैव गतवतीत्यर्थः॥ अर्थापत्तिं प्रमाणयति। अन्यथा उक्तवैपरीत्ये। त्वदीयो देहः किं
अनुकंपलात्वङ्कुसुमं तद्भरणं यस्य तादृशं कथं दृश्यते दृग्गोचरी भवतीत्यर्थः॥ अत्र च दूत्यरूपाति
जघन्यकर्मजौ विकार्यां त्वयि सता परा धाम्या ममपि यन्मेना सूपाना पितास्त्रिन्तैसर्गिको धर्मक
चेदि किं तु एवं सतज्ञामां त्वयि पद्दाधकबुध्या विश्वसिमि। यत्त्वयास्तेन तं विधेहरिदाराणि दुर्विदि

चेदहमनुरक्ता स्मि मंदभाग्या। तदेवं विविधवंचानासहस्रजनितप्रोद्दपरीतापपरिपाकपात्रत्वं ममयुक्तमेवेति वि
प्रलंभप्रभेदेर्ष्यामानव्यभिचारिनिर्वेदध्वनिः। निरगाइतिगति स्येति सिचो लुक्। अनुमानमलंकारः॥ देहमिति
वापाठः॥२३॥ ॥वक्रोक्तिगर्विता द्वैविध्यमाह॥ प्रेमगर्वितेत्यादि॥ प्रेमगर्वितामुदाहरति॥ वपुषीति॥ काचिदु
क्तिविशेषेण स्वात्मनिभर्तृप्रेमाधिक्यं सूचयंती सखीं वक्ति॥ हे सखि तव प्रभुः स्वामी तव वपुषि शरीरे र
त्नभस्त्रांबरनिर्मितविविधालंकारान् तनोति विस्तारयति इति हेतोः त्वं धन्यतमासि। सर्वो ज्जिसिद्धं किं
ब्र[illegible]वीमि किं वदामि। सर्वजनप्रसिद्धं स्त्वयि प्रियानुरागो मयाकिं वक्तव्य इति भावः॥ परंतु मे कांतः स
कलमनोरथपूरणनिपुणस्तथा मम कामना विषयः मदीये शरीरे तदीयेन यनेत्तयोरंतराले ब्रवधायकं
तत्रभीरुत्वं यत्रौलो विभूषणानि न कलयति। न धारयतीत्यर्थः। भूषणमपि मद्धि लोकनांतरायं संभावयन्
यथा मद्भर्त्ता मयि प्रेमवान् न तथा त्वद्भर्त्ता त्वयीति त्वत्तोप्यहं धन्यतमेति स्वाधिक्यं ख्यापितवतीति भावः॥
व्यतिरेकोऽलंकारः॥२४॥ ॥सौंदर्यगर्वितामुदाहरति॥ कलयतीति॥ काचित्स्व सखीं वक्ति॥ कांते प्रियेऽस्या नेत्र
योः कमलोपमानेकमलसाम्यं कलयति कुर्वति सति। वाचि सुधारसस्यामृतस्य साम्यं समानाकारत्वं प्रथय २७
ति ख्यापयति सति। सखि गोष्ठी ख्यापनपात्रे। कथय निवेदय किमाचरामि। निरूपमानयोर्मन्नेत्रयोः क
मलोपमानं निःसीमवाण्याः सुधातुल्यतामापादयति। किं प्रति विधेयं तन्निवेदयेत्यर्थः॥ अस्तुतावदेषा विचा
रणा। तस्मिन्कांते सहिष्णुतैव ताद्दशे वाक्य सहनशीलत्वमेव दोषः समजनि संजातेत्यर्थः॥ समजनीति ज
नेः कर्त्तरि लुङ्। दीपजनेति चिणि चिणो लुगिति लुक्। सहिष्णुतेति अलंतभी[illegible]तिइष्णुचितत्व॥२५॥ एष

मानवतीमुदाहरति॥ उदाहरणपर्यंतं स्पष्टं। अपरस्त्री दर्शनादिना मानवतीमुदाहरति। काचित्सखीं वदति। स्वेदे
ति॥ हे हत्वेण दरि प्रिये प्राले म्बरे ऽन्यामपरां विलोकयति पश्यति। भूषयत्यपि अलंकुर्वत्यपि सपि। एतद्दृश्यमानं
तवांगं शरीरं घकंचन कस्मिंश्चिदंगे पिच्छलं [illegible] स्वेदव्याप्तं चकास्तिशोभते। क्वचन कस्मिंश्चिद्देशे कंटकितं
संजातरोमांचमंगं शोभते। रम्याणां विहृतिरपि श्रियं तनोतीति भावः॥ एवं सति तव मानोऽभिमानः कप
दं अंघ्रिं हास्यति तत्स्खलनं विघ्नः न जानीमः॥ सागस्यपि प्रिये यसि अनुरागेण स्वेदादिव्याप्ते तवांगे तद्विरोधि
नो मानस्य [illegible] पदमपि दातुं स्थलं न पश्यामीत्यर्थः॥ अंगमंगमावितिपाठः स्तवसमंजसत्वादपपाठः॥२६॥
गोत्रस्खलनेन मानवतीमुदाहरति॥ यद्गोत्रस्खलनमिति॥ कश्चिद्गोत्रस्खलनकुपितां प्रियां
वक्ति॥ हे कांते यद्गोत्रस्खलनं त्वत्सपत्नीनामोच्चारणं मयाऽकारीति शेषः॥ तत्र तस्मिन्नामोच्चा
रणे यदि भ्रमं भ्रांतिं न मन्यसे। इदं भ्रांत्या कं न तु बुद्धिपूर्वकमेवेति चेन्न जानासि तर्हि रामालिव्या
लसंस्पर्शरूपं शपथं तत्र भ्रमे कारय। अनुष्ठापय। अनंतभाषणदोषपरिहाराय त्वच्छोभालीला
रूपनाभिकुंभेगतसर्पस्पर्शरूपं दिव्यं करिष्यामीत्यर्थः॥ गोत्रं नाम्नि कुले रत्न इत्यमरः॥२७॥ अ
न्यांगनासंगेन मानवतीमुदाहरति॥ दयितस्येति॥ दयितस्य भालदेशं कपोलभागं सपत्न्याश्च
रणयोरलक्तकेन पिंगलं बभ्रुवर्णं निरीक्ष्यावलोक्य सुदृशो नायिकायाः नयनकोणभासः कटा
क्षकांतयः कृतिमुक्ताः प्रवणरक्ताः शिखरोपमा अरुणरत्नोपमा बभूवुः जाता इत्यर्थः॥ पिंज
रमिति पाठः स्त्वलक्तकस्यपीतत्वासंभवादपपाठः॥२८॥ ॥प्रसंगादासामवस्थाभेदेन भेदान्

णिनिरूपयन्नाह॥ एताइति॥ षोडशेति॥ स्वीयात्रयोदशभेदभिन्नाउभयभेदवतीपरकीयासामान्यवनिता
एकेति। षोडशेत्यर्थः॥ अवस्थाएवाह॥ प्रोषितभर्तृकेतिस्पष्टं। चतुरधिकाशीतियुतंशतत्रयंभेदाभवंतीति॥ परि
गणनमेतन्नतुसंख्या। अन्यासामपिसंभवात्। उक्तंवान्यत्र। जातिकालवयोऽवस्थाभावकैर्दर्शसायकैः। इ
तराःअप्यसंख्याता नोक्ताविस्तरभियेति। परेकेचनापितुमनुवदति॥ यत्त्विति स्पष्टं। तत्र प्रोषितभर्तृकां
लक्षयति॥ देशांतरेति॥ देशांतरइत्यस्यसत्त्वमाह॥ उक्तेति॥ साकिंक्रियावतीत्याह॥ अस्याइति॥ दशा
वस्थाश्चतुःशीत्यादयः॥ तत्रमुग्धाप्रोषितभर्तृकामुदाहरति॥ दुःखमिति॥ दुःखमधर्मफलंदीर्घत
रमपिभर्तृगमनदिवसमारभ्याद्ययावदुपचीयमानमपिवहतिप्राप्नोति॥ परंसखीवर्गायसखीस
मूहायनोभाषतेनकथयतीत्यर्थः। निविघदुःखंसुखीभवेतितत्प्रतीकारंचजभतेइत्यादिदृशा। निवे
दयितुंयोग्यमपिपरस्परासख्यानेनसर्वैर्ज्ञातव्यंतत्प्रतीकारश्यचयतनीयं। इयंसलज्जापामेमर
णादप्यधिकमितिधियानोक्तवतीतिभावः। पुनरन्यदपिशैवालैस्तापनोदकजलनी खिलीभिः
शयनप्रास्तरणंस्रजत्यपिनिर्मात्यपि लज्जयाशैवालनिर्मितशयनीयनिद्रया विरहसंता २९
पंज्ञास्यतीतिबुध्यानशेते। ननिद्राति। किंचकंठेगद्गदवाचंसबाष्पांस्खलितांगिरंअंचतिदधा
ति॥ दशावाष्पोदकमश्रुजलंनधत्तेनदधाति॥ एवंबाह्यचेष्टांगोपयंत्यंबुजमुखीकमलवदना
यत्येनप्रकारेणसंतापंविरहतापंसहतेअनुभवतितत्प्रकारंचेतोभवश्चेतस्विस्थित्यातत्रैवयां त्यार
मदनोवेदजानाति। अंबुजमुखीत्यनेनम्लानवदनसूचकेनबाह्यसंतापव्यंजकाभावानुक्तंम

नोभवेनैवज्ञानमितिव्यज्यते। चेतइतिश्चाप्यस्तयोरित्यालोपः। वेदेतिवेदत्तिपोणलिसिद्धं। विशेषोक्तिरलंका
रः॥ ३९॥ ॥मध्याप्रोषितभर्तृकामुदाहरति। वासइति। काचित्सखींवक्ति॥ हेसखिदेहस्यपरिधानीयंतद
वयत्पूर्वमासीत्। कथनेपथ्यंतदेव। करिमेखला सैवयापूर्वंस्थिता। एवंसतिवाचालाःबहुभाषिणोपे
भ्रमरास्तैरतिरमणीयेसुरभौवसंतेमधौ अद्यास्मिन्कालेअधिकमसहंभवतिकिंनिदानंकिंकारणं।
तत्कथयेत्यर्थः। अद्याधिकमित्यनेनवसंतारंभात्प्राग्विरहशोपनायभूषादिग्रहणवती। प्राप्तएवतुवसं
तेऽद्वैतमन्मथव्यथाकतयाभूषाविधिमप्यसहमानाबालज्जयामदनसाम्यंव्यज्यते। अत्रनर्मस्फे
टोऽलंकारः॥ ४०॥ प्रौढांप्रोषितभर्तृकामुदाहरति॥ मालेति॥ बालांबुजमयीमाला। बालानिनवोदितानियानि
तु अंबुजानिकमलानितेषांदलानिपत्राणितैर्ग्रथितस्यामेवंभूतामाला। मौक्तिकीमुक्ताघटिताहारयष्टिर्हारलतिका। कं
चीकटिमेखलाचएतानिप्रभवतिप्रभुत्वं। क्तियुक्तेहरौसकलदुःखापहारकेतस्मिन्प्राणेप्रस्थितेसति। सुभ्रुवोना
नुगतानीतिभावः॥ बालानांकमलदलानांविरहदाहमर्मरीसतानांनाशोहारादेरपिदाहकरत्वेनत्यागेऽस्त्रे
ह्या। अन्यदप्याश्चर्यंब्रूमः॥ बाहोर्हस्तस्यबलयंकंकणंकिमपिएकापिधमनीनाडीवर्त्तते। तिष्ठति। नवेति
त्रगमनेऽत्यन्तदृष्ट्या। एतेनतथेयंतद्विरहार्दिताययाऽचेतनस्यापिवलयस्यनाडीगवेषणानुकूल्यंजातमिति। ध्व
न्यते। अत्रप्रागल्भ्यंस्फुटमेव॥ नाडीतुधमनीशिरेत्यमरः॥ स्फुटोस्फुटयोरुत्प्रेक्षयोःसंसृष्टिः॥ ४१॥ ॥परकी

यां प्रोषितभर्तृकामुदाहरति। श्वश्रूरिति॥ श्वश्रूर्भर्तृजननी पत्युप्रदेशं ददाति तत्र अंगं दूषयति प्रोते। सघस्तक्षिप्र
न्नेव बका लेमर्भ्रं कया तया पाणिना न संस्पृश्यते। या तु देवरपत्न्या वा चिमिन्निनाण वचसा प्रत्युत्तरं प्रति
वचः दीयतैं किं च। क्रूरं गीर्दृशा कृतवहु क्रूरः ज्वलनवद्दुः श्वासः न मुच्यते न प्रेर्यते। अत्र प्रच्छिन्नका मित्वं स्फु
रमेव॥८२॥ ॥सामान्यवनितां प्रोषितभर्तृकामुदाहरति॥ विरहविदितमिति। विरहेण विदितं ज्ञातं अंतं
र्मनसि प्रेमप्रीतिं मर्मेति ज्ञेयः। यदीयमेवं विरहवती। तदीयमप्यतीव प्रेमवती ब्रह्मविषयकमप्रेमज्ञा
त्वेत्यर्थः। कांतः कामी तस्माद्दूरांतराद्गत्य इव विलंबं वितरिष्यतीति हेतोर्द्वारदेशे प्रतिहारदेशे उपवि
श्य पुरः प्रोषितवेश्यापानेत्रयोर्मरीचिनिचयैर्निक्षिप्य बाष्पबिंदून् अश्रुकणान् विस्तरं ऊर्ध्वं। प्रकट
यतीत्यर्थः॥ मरीचीनां कटुत्वाद्बाष्पोत्पादकत्वं। अपह्नुतिरलंकारः। काव्यलिंगानुप्राणितः॥ मालिनी वृत्तं॥ सन्धः
८३॥ ॥क्रमप्राप्तां खंडितां लक्षयति॥ प्रातरिति स्पष्टं अन्यकालोगते प्रेयसि खंडिता त्वं न स्यात्तया
चाव्याप्तिरिति आह॥ प्रातरितीति॥ अन्यकालोपलक्षणमित्यर्थः॥ न घापारानाह॥ अस्याइत्यादि २९
स्फुटं॥ तत्र मुग्धां खंडितामुदाहरति॥ वक्ष इति स्फुटोर्थः॥८४॥ ॥मध्यां खंडितामुदाहरति॥ वक्षो
ज इति॥ वक्षोजाभ्यां स्तनाभ्यां चिह्नितं संजातचिह्नं दयितस्य प्राणेश्वरस्य वक्षः उरःस्थलं वीक्ष्य दृगोर्वि
री लक्ष्य दीर्घं न निश्वसिति। किंचिन्नैव जल्पति किं तु प्रातरुदकेन मुखं प्रक्षालयंती बाला अश्रुकणानिति
२ वि रोधयतीत्यर्थः॥ प्रियकारिणं प्रति स्वयं विप्रियकरणेऽधिकमौदास्यमेव भवेत् नासक्तिरिति ध्वनितो
भावः॥ अपह्नुतिरलंकारः॥ वसंततिलका वृत्तं॥८५॥ प्रौढां खंडितामुदाहरति॥ मागुढीस्येति॥ कोपि